प्रधानः पाठ्यक्रमः (Major) 1.4: चार्वाकदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. चार्वाकदर्शनस्य मूलतत्त्वानां प्रसिद्धसिद्धान्तानाञ्च सम्यक्बोधनम्।
2. प्रमाण-प्रमेय-मोक्षस्वरूपाणां परिज्ञानम्।
3. वैदिकदर्शनैः सह तुलनात्मकदृष्ट्या चार्वाकदर्शनस्य सिद्धान्तानामवबोधनम्।
4. चार्वाकदर्शनस्य व्यापकत्वपरिचायनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दर्शनशब्दस्य व्युत्पत्तिं, दर्शनानां भेदं च व्याख्यातुं समर्थाः भविष्यन्ति।
2. चार्वाकजैनदर्शनस्य सामान्यवर्णनं कर्तुं समर्थाः भविष्यन्ति।
3. चार्वाकदर्शनानुसारं जगतः स्वरूपं वर्णयितुं शक्ष्यन्ति।
4. चार्वाकदर्शनानुसारं प्रमाणप्रमेयस्वरूपं सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. वैदिकदर्शनेन सह चार्वाकदर्शनस्य तुलनात्मकविवेचनं कर्तुं समर्थाः भविष्यन्ति।
6. चार्वाकजैनदर्शनस्य मुख्यसिद्धान्तानां विवेचनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	चार्वाकदर्शनम्	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. चार्वाकदर्शनस्य सामान्यपरिचयः। **श्रेयोऽङ्कः १**

- दर्शनभेदविचारः।
- चार्वाकदर्शनस्येतिहासः।
- चार्वाकशब्दविचारः।
- लोकायतिकशब्दविचारः।
- चार्वाकदर्शनस्य व्यापकत्वं महत्वञ्च

अन्वितिः २. चार्वाकदर्शनस्य सिद्धान्ताः। **श्रेयोऽङ्कः १**

- पुत्रात्मवादः।

- देहात्मवाद :।
- इन्द्रियात्मवाद:।
- प्राणात्मवाद:।
- मनआत्मवाद:।
- सुखवाद:।
- स्वभाववाद:।

अन्वितिः ३. चार्वाकदर्शने ज्ञानमीमांसा तत्त्वनिरूपणञ्च। **श्रेयोऽङ्कः १**

- ज्ञानमीमांसा प्रत्यक्षप्रमाणविवेचनञ्च।
- अनुमानप्रमाणखण्डनम्।
- तत्त्वमीमांसा।
- चैतन्यविचार:।

अन्वितिः ४. चार्वाकमते आचारमीमांसा मोक्षविचारश्च। **श्रेयोऽङ्कः १**

- ईश्वरः।
- आत्मा।
- मोक्षः।
- आचारमार्गः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माधवाचार्यः (विद्यारण्यः), (2010), सर्वदर्शनसंग्रहः, वाराणसी : चौखम्बा।
2. नागसम्पिगे, ए. वि., अडिगः, शङ्करनारायणः, (2012), षड्दर्शनसारः, बेङ्गलूरुः पूर्णप्रज्ञसंशोधनमन्दिरम्।
3. मिश्रः, प्रो. गोपबन्धु,(2020),शास्त्रपरिचायिका, वेरावलम् : श्रीसोमनाथसंस्कृतविश्वविद्यालयः।
4. झा, आचार्य आनन्द, (2013), चार्वाक दर्शन, लखनऊ : उत्तर प्रदेश हिन्दी संस्थान।
5. Chattopadhyaya, Debiprasad, (1959), Lokayat A study in Ancient Indian Materialism, New Delhi : People's Publishing House.

सहायकाः ग्रन्थाः (Additional Readings)

1. त्रिपाठी, शिवदत्तः, भारतीयदर्शनों का इतिहास, वाराणसी : चौखम्बा विद्या भवन।
2. उपाध्याय, बलदेवः, भारतीयदर्शन – साङ्ख्य और योग, प्रयागराज : हिंदी साहित्य सम्मेलन।
3. दासगुप्त, सुरेन्द्रनाथः, भारतीयदर्शन (भाग–1), अनुवादक: - राधाकृष्ण शर्मा, दिल्ली : भारतीयज्ञानपीठ दिल्ली।

4. उपाध्याय , बलदेव, (2002), भारतीय दर्शन, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
5. गुप्त, जे. एल. चैतन्य', सम्पादक, (2004), षड्दर्शनसूत्रसङ्गहः, नई दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान|
6. गैरोला , वाचस्पति, (1962), भारतीय दर्शन, इलाहाबाद : लोकभारती प्रकाशन।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 2.1: बौद्धदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. बौद्धदर्शनस्य तत्त्वमीमांसायाः सम्यगवबोधनम्।
2. बौद्धदर्शनानुसारं प्रमाण-प्रमेय-निर्वाणस्वरूपाणां परिज्ञानम्।
3. बौद्धदर्शनस्य अन्यदर्शनेन सह तुलनात्मकदृष्ट्या अवबोधनम्।
4. बौद्धदर्शनस्य प्रसिद्धसिद्धान्तानां सम्यक्बोधनम्।
5. बौद्धदर्शनस्य आचारमीमांसायाः स्वरूपज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. बौद्धदर्शनस्य सिद्धान्तान् व्याख्यातुं समर्थाः भविष्यन्ति।
2. बौद्धदर्शनस्य वैशिष्ट्यं ज्ञातुं समर्थाः भविष्यन्ति।
3. बौद्धदर्शनानुसारं जगतः स्वरूपं वर्णयितुं शक्ष्यन्ति ।
4. बौद्धदर्शनानुसारं प्रमाणप्रमेयस्वरूपं सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. वैदिकदर्शनेन सह बौद्धदर्शनस्य तुलनात्मकविवेचनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	बौद्धदर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. बौद्धदर्शनस्य सामान्यपरिचयः। **श्रेयोऽङ्कः १**

- बौद्धदर्शनस्येतिहासः, गौतमबुद्धस्य जीवनकालः।
- बौद्धदर्शनस्याचार्यपरम्परा -
  - सङ्घभद्रः
  - नागार्जुनः
  - आर्यदेवः
  - भव्यः
  - असङ्गः
  - वसुबन्धुः
  - दिङ्नागः
  - धर्मकीर्त्तिः
  - स्थिरमतिः
  - धर्मपालः

- शान्तरक्षितः
- त्रिपिटकसाहित्यपरिचयः
- सुत्तपिटकम्
- विनयपिटकम्
- अभिधम्मपिटकम्

अन्वितिः २. बौद्धदर्शनस्य ज्ञानमीमांसा तत्त्वमीमांसा च। **श्रेयोऽङ्कः १**

- बौद्धदर्शने ज्ञानस्वरूपम्, प्रत्यक्षप्रमाणम्, अनुमानप्रमाणम्।
- बौद्धदर्शने तत्त्वनिरूपणम्।

अन्वितिः ३. बौद्धदर्शनस्य आचारमीमांसा। **श्रेयोऽङ्कः १**

- आर्यसत्यानि –
  - दुःखम्
  - दुःखसमुदयः
  - दुःखःनिरोधः
  - दुःखनिरोधगामिनीप्रतिपत्
- प्रतीत्यसमुत्पादवादः (द्वादशनिदानानि)
- रत्नत्रयम् –
  - शीलः
  - समाधिः
  - प्रज्ञा
- निर्वाणविचारः

अन्वितिः ४. बौद्धदर्शनस्य प्रधानसिद्धान्ताः। **श्रेयोऽङ्कः १**

- नैरात्म्यवादः।
- सन्तानवादः।
- बौद्धमते सम्प्रदायाः तेषां सिद्धान्ताश्च –
  - महायानम्
  - हीनयानम्
  - वैभाषिकाः
  - सौत्रान्तिकाः
  - योगाचाराः
  - माध्यमिकाः
- बाह्यार्थप्रत्यक्षवादः, बाह्यार्थानुमेयवादः, विज्ञानवादः, शून्यवादश्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माधवाचार्यः, (2010), सर्वदर्शनसंग्रहः, वाराणसी : चौखम्बा।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, बलदेव, (1946), बौद्ध दर्शन, वाराणसी : शारदा मन्दिर।
2. धर्मकीर्त्तिः, (1972), न्यायबिन्दु, जयपुर : दर्शन प्रतिष्ठान।
3. उपाध्याय, बलदेवः, (1976), भारतीयदर्शन, वाराणसी : चौखम्बा ओरियण्टालिया।
4. पाण्डेय, रामचन्द्र , अञ्जू, (1990), आचार्य नागार्जुन का निःस्वभावता-दर्शन, दिल्ली : ईस्टर्न बुक लिंकर्स।
5. नागार्जुन, (1999), माध्यमिककारिका, दिल्ली : मोतीलाल बनारसी दास।
6. गुप्त, कनछेदीलाल, (2014), धम्मपदम्, वाराणसी : चौखम्बा विद्या भवन।
7. मिश्रः, प्रो.गोपबन्धु, (2020), शास्त्रपरिचायिका, वेरावलम् : श्रीसोमनाथसंस्कृतविश्वविद्यालयः।
8. वरखेडी, श्रीनिवासः, (2024), शास्त्रपद्धतिः, नवदेहली : केन्द्रीयसंस्कृतविश्वविद्यालयः।
9. दासगुप्त, सुरेन्द्रनाथः, भारतीयदर्शन (भाग–1), अनुवादकः - राधाकृष्ण शर्मा, दिल्ली : भारतीयज्ञानपीठ।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: मीमांसादर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course objectives)

1. मीमांसाशास्त्रपरिचयः शास्त्रे प्रवेशलाभश्च।
2. मीमांसाशास्त्रविषयाणां प्रतिपादनसामर्थ्यलाभः।
3. मीमांसान्यायानां सञ्चारक्रमावबोधः।
4. मीमांसाशास्त्रसिद्धान्तदृढीकरणे न्यायानाम् उपादेयत्वावगमः।
5. मीमांसाशास्त्रे प्रतिपादितानां शास्त्रान्तरसम्बद्धानां विषयाणां बोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मीमांसाविषयान् विज्ञाय स्वशास्त्रे सम्बन्धं कल्पयितुं शक्ष्यन्ति।
2. मीमांसान्यायानां समन्वयनं कृत्वा स्वशास्त्रसिद्धान्तं दृढीकर्तुं सामर्थ्यं प्राप्स्यन्ति।
3. शास्त्रान्तरेण सह मीमांसादर्शनस्य सिद्धान्तानां तुलनां कृत्वा विशेषाध्ययनं कर्तुं शक्ष्यन्ति।
4. मीमांसादर्शनस्य समन्वयात्मिकां पद्धतिं विज्ञाय वादप्रतिपादने समर्थाः भविष्यन्ति।
5. मीमांसादर्शनस्य वेदवाक्यार्थपद्धतिम् अधिगम्य वाक्यार्थविश्लेषणं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	मीमांसादर्शनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मीमांसादर्शनस्य आचार्यपरम्परा। **श्रेयोऽङ्कः १**

- मीमांसादर्शनस्य उद्भवो विकासश्च।
- मीमांसापदार्थविचारः।
- सूत्रकारः - महर्षिः जैमिनिः, भाष्यकारः- शबरमुनिः।
- मीमांसादर्शने प्रस्थानभेदाः।
- कुमारिलभट्टः।
- प्रभाकरमिश्रः।
- प्रमुखाः भाट्टमीमांसकाः -
    - पार्थसारथिमिश्रः

  - उम्बेकाचार्यः
  - कमलाकरभट्टः
  - खण्डदेवः
  - वाचस्पतिमिश्रः
  - आपदेवः
  - लौगाक्षिभास्करः
- गुरुमतस्य प्रमुखाः आचार्याः -
  - शालिकनाथः
  - नन्दीश्वरः
  - रामानुजाचार्यः
  - अहोबलसूरिः

अन्वितिः २.२ मीमांसादर्शनस्य प्रमाणमीमांसा। **श्रेयोऽङ्कः १**

- मीमांसादर्शने प्रमाणसामान्यलक्षणम्।
- प्रमाणानि- प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिश्च।
- धर्मबोधकप्रमाणानि - विधिः, अर्थवादः, मन्त्रः, नामधेयं, स्मृतिः, आचारश्च।
- विनियोजकप्रमाणानि - श्रुतिः, लिङ्गं, वाक्यं, प्रकरणं, स्थानं, समाख्या च।
- क्रमबोधकप्रमाणानि - श्रुतिः, अर्थः, पाठः, स्थानं, मुख्यः, प्रवृत्तिः।
- प्रमाणचिन्तने भाट्ट-प्राभाकरयोः मतभेदः।
- स्वतःप्रामाण्यम्।

अन्वितिः ३. मीमांसादर्शनस्य प्रमेयमीमांसा। **श्रेयोऽङ्कः १**

- धर्मः।
- प्रमेयाणि – द्रव्यं, जातिः, गुणः, क्रिया, अभावः च।
- अपूर्वः।
- स्वर्गः।

अन्वितिः ४. मीमांसादर्शनस्य प्रमुखाः सिद्धान्ताः। **श्रेयोऽङ्कः १**

- वेदापौरुषेयत्वम्।
- भावनासिद्धान्तः।
- शब्दनित्यत्वम्।
- स्वतःप्रामाण्यवादः।

- जगन्नित्यतावादः।
- भाट्टानां विपरीतख्यातिः।
- प्राभाकराणाम् अख्यातिः।
- वाक्यार्थविचारपद्धतिः/शाब्दबोधः।
- तात्पर्यनिर्णायकलिङ्गानि।
- अधिकरणपद्धतिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. लौगाक्षिभास्करः, अर्थसंग्रहः, वाराणसी : चौखम्बा प्रकाशन।
2. नारायणभट्टः, मानमेयोदयः, वाराणसी : चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, (1976), बलदेव, वाराणसी : चौखम्बा ओरियण्टालिया।
2. सेनापतिः, सुकान्तकुमारः, दर्शनार्णवः, (2024), नई दिल्ली : केन्द्रीयसंस्कृतविश्वविद्यालयः।
3. आपदेवः, मीमांसान्यायप्रकाशः, नई दिल्ली : श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृत विद्यापीठ।
4. मुसलगाँवकर, गजाननशास्त्री, वाराणसी : चौखम्बा प्रकाशन।
5. श्रीकृष्ण यज्वा, मीमांसापरिभाषा, वाराणसी : चौखम्बा प्रकाशन।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: औपनिषददर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives):

1. उपनिषत्सु विद्यमानानां दर्शनविचारबीजानाम् अभिज्ञानम्।
2. उपनिषद्वाङ्मयस्य स्वरूपप्रवृत्तिप्रयोजनज्ञानम्।
3. उपनिषदां भाष्यपद्धतेः परिज्ञानम्।
4. उपनिषत्सु वर्णितानां सदाचाराणां सम्प्राप्तिः।
5. विविधदर्शनप्रस्थानेषु उपनिषदां प्रभावस्य अन्वेषणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. उपनिषत्सु विद्यमानानि दर्शनविचारबीजानि अभिज्ञातुं प्रभविष्यति।
2. उपनिषद्वाङ्मयस्य स्वरूपं प्रवृत्तिं प्रयोजनञ्च विज्ञाय तत्र विद्यमानान् विषयान् प्रतिपादयितुं समर्थाः भविष्यन्ति।
3. उपनिषदां भाष्यपद्धतिं विज्ञातुं बोधयितुं च समर्थाः भविष्यन्ति।
4. उपनिषत्सु वर्णितानां सदाचाराणां स्वजीवने सम्प्रयोगं कर्तुं प्रभविष्यन्ति।
5. विविधदर्शनप्रस्थानेषु उपनिषदां प्रभावस्य अन्वेषणं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	औपनिषददर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. उपनिषद्वाङ्मयस्य परिचयः। **श्रेयोऽङ्कः १**

- उपनिषच्छब्दस्य व्युत्पत्तिः निर्वचनञ्च।
- उपनिषदां परिचयः।
- उपनिषद्वाङ्मयस्य प्रयोजनम्।
- उपनिषद्वाङ्मयस्य वैशिष्ट्यप्रतिपादनम्।
- उपनिषदां प्रतिपाद्यविषयाः प्रवृत्तयश्च।

अन्वितिः २. उपनिषत्सु वर्णिताः प्रमुखाः दार्शनिकविचाराः। **श्रेयोऽङ्कः १**

- आत्मा।
- ब्रह्म।
- जगत् (सृष्टि-लयप्रक्रिया)
- पञ्चकोशानाम् अवधारणा।
- पुनर्जन्म।
- उपासना।
- कर्मवादः।
- मोक्षः।

अन्वितिः ३. उपनिषदां भाष्यपद्धतिविमर्शः। **श्रेयोऽङ्कः १**

- अधिकरणपद्धतिः।
- उपोद्घातपद्धतिः।
- व्युत्पत्तिविवेचनपद्धतिः।
- शास्त्रार्थपद्धतिः।
- प्रश्नोत्तरपद्धतिः।
- तर्कपद्धतिः।
- निर्वचनपद्धतिः।
- दृष्टान्तपद्धतिः।
- न्यायपद्धतिः।
- लक्षण-परिभाषापद्धतिः।

अन्वितिः ४. औपनिषददर्शनम्। **श्रेयोऽङ्कः १**

- विविधवेदान्तदर्शनसिद्धान्तेषु उपनिषदां प्रभावः।
- साङ्ख्ययोगदर्शनसिद्धान्तेषु उपनिषदां प्रभावः।
- अन्यदर्शनसिद्धान्तेषु उपनिषदां प्रभावः।
- उपनिषत्सु वर्णिता आचारमीमांसा।
- श्रीमद्भगवद्गीतायाः दार्शनिकं महत्त्वम् ।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. आचार्यशङ्करभगवत्पादः, (२००९), ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थ, गोरखपुर : गीताप्रेस।
2. आचार्यशङ्करभगवत्पादः, (२००९), छान्दोग्य उपनिषद्, शाङ्करभाष्यार्थ, गोरखपुर : गीताप्रेस।
3. आचार्यशङ्करभगवत्पादः, (२००९), बृहदारण्यक उपनिषद्, शाङ्करभाष्यार्थ, गोरखपुर : गीताप्रेस।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, बलदेव (प्रधान सम्पादक), (१९९६), संस्कृत-वाङ्मय का बृहद् इतिहास (दशम-खण्ड, वेदान्त), लखनऊ : उत्तर प्रदेश संस्कृत संस्थान ।
2. उपाध्याय, बलदेव, (१९९६), भारतीयदर्शन का इतिहास, शारदा प्रकाशन।
3. शर्मा, राममूर्ति, (२००८), भारतीय दर्शन की चिन्तनधारा, दिल्ली, चौखम्भा ओरियन्टालिया।
4. प्रो. सुरेन्द्र सिंह नेगी, (२००१), भारतीय दर्शन, गाजियाबाद, के. एल. पचौरी प्रकाशन।
5. भद्रेशदासः, (2022), स्वामिनारायणसिद्धान्तसारः, अहमदाबाद : स्वामिनारायण-अक्षरपीठम्।
6. भद्रेशदासः, (2022), स्वामिनारायणसिद्धान्तसुधा, अहमदाबाद : स्वामिनारायण-अक्षरपीठम्।
7. भद्रेशदासः, (2022), स्वामिनारायणभाष्यम्, अहमदाबाद : स्वामिनारायण-अक्षरपीठम्।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.4: अद्वैतवेदान्तदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अद्वैतवेदान्तशब्दार्थावबोधनम्।
2. प्रस्थानत्रयपरिचयावाप्तिः।
3. प्रमुखाद्वैताचार्याणां परिचयप्राप्तिः।
4. अनुबन्धचतुष्टयावबोधनम्।
5. अद्वैतवेदान्तदर्शनप्रतिपादितप्रमाणस्वरूपावगमनम्।
6. अध्यासस्य तत्कारणभूताविद्यायाः स्वरूपावबोधनम्।
7. जीवेश्वरस्वरूपावबोधनं मोक्षस्वरूपावगमश्च।
8. मोक्षसाधनावबोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अद्वैतवेदान्तशब्दार्थं निर्वक्तुं शक्ष्यन्ति।
2. प्रस्थानत्रयपरिचयं प्रदातुं शक्ष्यन्ति।
3. प्रमुखाद्वैताचार्याणां परिचयं दातुं समर्थाः भविष्यन्ति।
4. अनुबन्धचतुष्टयं विवेचयितुं शक्ष्यन्ति।
5. अद्वैतवेदान्तप्रतिपादितप्रमाणानां विश्लेषणं कर्तुं शक्ष्यन्ति।
6. अध्यासस्य तत्कारणभताविद्यायाः स्वरूपोपस्थापने समर्थाः भविष्यन्ति।
7. जगत्कारणत्वनिरूपणं कर्तुं समर्थाः भविष्यन्ति।
8. जीवेश्वरस्वरूपं मोक्षस्वरूपं च प्रतिपादयितुम् अधिकारिणः भविष्यन्ति।
9. मोक्षसाधनानाम् उपस्थापने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	अद्वैतवेदान्तदर्शनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. अद्वैतवेदान्तपरम्परापरिचयः। **श्रेयोऽङ्कः १**

- अद्वैतशब्दार्थः वेदान्तशब्दार्थश्च।
- प्रस्थानत्रयी।
- प्रमुखाचार्याणां परिचयः।

- अनुबन्धचतुष्टयम्।

अन्वितिः २. अद्वैतवेदान्ते प्रमाणविचारः। **श्रेयोऽङ्कः १**

- प्रमाणलक्षणविचारः।
- प्रत्यक्षप्रमाणस्वरूपम्।
- अनुमानप्रमाणस्वरूपम्।
- उपमानप्रमाणस्वरूपम्।
- शब्दप्रमाणस्वरूपम्।
- अर्थापत्तिप्रमाणस्वरूपम्।
- अनुपलब्धिप्रमाणस्वरूपम्।

अन्वितिः ३. अद्वैतवेदान्ते तत्त्वविचारः। **श्रेयोऽङ्कः १**

- अध्यासविचारः।
- अविद्यास्वरूपविचारः।
- ब्रह्मणः जगत्कारणत्वविचारः।
- जीवेश्वरस्वरूपविचारः।
- बह्मस्वरूपविचारः।
- महावाक्यार्थविचारः।
- मोक्षस्वरूपविचारः।

अन्वितिः ४. अद्वैतवेदान्ते मोक्षसाधनविचारः। **श्रेयोऽङ्कः १**

- साधनचतुष्टयविचारः।
- मोक्षं प्रति निष्कामकर्मणः साधनत्वम्।
- मोक्षं प्रति पराभक्तेः साधनत्वम्।
- मोक्षं प्रति ज्ञानस्य साक्षात् साधनत्वम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीसदानन्दयोगीन्द्रः, वेदान्तसारः।
2. श्रीधर्मराजाध्वरी, वेदान्तपरिभाषा।

सहायकाः ग्रन्थाः (Additional Readings)

1. ईशादि नौ उपनिषद् (शाङ्करभाष्यम्), (2006), गीता प्रेस, गोरखपुर

2. श्रीशङ्करभगवत्पादाचार्यः, (2017), ब्रह्मसूत्रभाष्यम्, वाराणसी : चौखम्बा विद्याभवन
3. श्रीशङ्करभगवत्पादाचार्यः, (2021), विवेकचूडामणिः, गोरखपुर : गीता प्रेस।
4. श्री शङ्करभगवत्पादाचार्यः, भगवद्गीताभाष्यम्, गोरखपुर : गीता प्रेस।
5. आचार्यः अप्पय्यदीक्षितः, सिद्धान्तलेशसंग्रहः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

चितस्वशास्त्रविषयक-पाठ्यक्रमाः

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

चितस्वशास्त्रविषयः (DSE) 1.क.1: शैवदर्शनानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. काश्मीरशैव-वीरशैवविशिष्टाद्वैत-शैव-दर्शनानाम् उद्भवविकासयोः ज्ञानप्रदानम्।
2. नकुलीशपाशुपत-शाक्तदर्शनयोः उद्भवविकासबोधनम्।
3. काश्मीरशैव-वीरशैवविशिष्टाद्वैत-शैव-दर्शनानां ज्ञानमीमांसावबोधः।
4. नकुलीशपाशुपत-शाक्तदर्शनयोः ज्ञानमीमांसापरिचयः।
5. काश्मीरशैव-वीरशैवविशिष्टाद्वैत-शैव-दर्शनानां तत्त्वमीमांसापरिज्ञानम्।
6. बिम्बप्रतिबिम्बवाद-आभासवाद-परिणामवादानां परिज्ञानम्।
7. शक्तिविशिष्टाद्वैत-शैवाद्वैत-स्वरूपाद्वैतवादानां ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. काश्मीरशैव-वीरशैवविशिष्टाद्वैत-शैव-नकुलीशपाशुपत-शाक्त-दर्शनानाम् उद्भवविकासपरम्परां वर्णयितुं शक्ष्यन्ति।
2. काश्मीरशैव-वीरशैवविशिष्टाद्वैत-शैव-नकुलीशपाशुपत-शाक्त-दर्शनानां ज्ञानमीमांसां निरूपयितुं समर्थाः भविष्यन्ति।
3. काश्मीरशैव-वीरशैवविशिष्टाद्वैत-शैव-दर्शनानां तत्त्वमीमांसां वर्णयितुं शक्ष्यन्ति।
4. बिम्बप्रतिबिम्बवादं, आभासवादं, परिणामवादं, शक्तिविशिष्टाद्वैतवादं, शैवाद्वैतवादं, स्वरूपाद्वैतवादञ्च विश्लेषयितुं समर्थाः भविष्यन्ति।
5. शैवदर्शनानां वैज्ञानिकतार्किकतत्त्वचिन्तनात्मकपद्धतिं विविच्य आधुनिकदर्शनेषु तस्य प्रासंगिकताम् अपि अन्वेष्टुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.1	शैवदर्शनानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शैवदर्शनपरम्परा। **श्रेयोऽङ्कः १**

- काश्मीरशैवदर्शनस्य उद्भवो विकासश्च।

- शैवदर्शनस्य उद्भवो विकासश्च।
- वीरशैवविशिष्टाद्वैतदर्शनस्य उद्भवो विकासश्च।
- नकुलीशपाशुपतशैवदर्शनस्य उद्भवो विकासश्च।
- शाक्तदर्शनस्य उद्भवो विकासश्च।

अन्वितिः २. शैवदर्शनानां ज्ञानमीमांसा। **श्रेयोऽङ्कः १**

- शैवदर्शनस्य ज्ञानमीमांसा।
- काश्मीरशैवदर्शनस्य ज्ञानमीमांसा।
- वीरशैवविशिष्टाद्वैतदर्शनस्य ज्ञानमीमांसा।
- नकुलीशपाशुपतशैवदर्शनस्य ज्ञानमीमांसा।
- शाक्तदर्शनस्य ज्ञानमीमांसा।

अन्वितिः ३. शैवदर्शनानां तत्त्वमीमांसा। **श्रेयोऽङ्कः १**

- शैवदर्शनस्य तत्त्वमीमांसा।
- काश्मीरशैवदर्शनस्य तत्त्वमीमांसा।
- वीरशैवविशिष्टाद्वैतदर्शनस्य तत्त्वमीमांसा।
- नकुलीशपाशुपतशैवदर्शनस्य तत्त्वमीमांसा।
- शाक्तदर्शनस्य तत्त्वमीमांसा।

अन्वितिः ४. शैवदर्शनानां प्रमुखसिद्धान्ताः। **श्रेयोऽङ्कः १**

- बिम्बप्रतिबिम्बवादः, आभासवादः।
- प्रत्यभिज्ञासिद्धान्तः, परिणामवादः।
- शक्तिविशिष्टाद्वैतवादः (वीरशैवविशिष्टाद्वैतवादः)
- शैवाद्वैतवादः, स्वरूपाद्वैतवादः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीकण्ठः, १९८६, ब्रह्मसूत्रभाष्यम्, अप्पयदीक्षितकृतशिवार्कमणिदीपिकाव्याख्यासहितम्, दिल्ली : नाग पब्लिशर्स।
2. श्रीकण्ठः, १९८६, ब्रह्मसूत्रभाष्यम्, अप्पयदीक्षितकृतशिवार्कमणिदीपिकासहितम्, व्या. द्विवेदी, व्रजवल्लभः, चतुःसूत्रीपर्यन्तम्, वाराणसी : जंगमवाणीमठः।

3. श्रीकण्ठः, १९०८, ब्रह्मसूत्रभाष्यम्, अप्पयदीक्षितकृतशिवार्कमणिदीपिकाव्याख्यासहितम्, बम्बई : निर्णयसागरप्रेस।
4. भट्टाचार्यः, पञ्चाननतर्करत्नः, २००५, शक्तिभाष्यम्, कविराजः, गोपीनाथः, (भूमिकाकारः), दिल्ली : परिमल-पब्लिकेशन्स।
5. श्रीपतिः, २००३, श्रीकरभाष्यम्, रावः, हयवदनः, नई-दिल्ली : अक्षयप्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. त्रिपाठी, आलोकमणिः, १९९८, पाशुपतसूत्र-पञ्चार्थभाष्यम्, दिल्ली : प्रतिभाप्रकाशनम्।
2. टि. जि. सिद्धप्पाराध्यः, १९६१, शक्तिविशिष्टाद्वैतदर्शनम्, बालेहोन्नूर : रम्भापुरीसंस्थानमठः।
3. पाण्डेयः, ब्रजेशकुमारः, २००८, श्रीभाष्य सिद्धान्त और प्रतिपक्ष, दिल्ली : शिवालिकप्रकाशनम्।
4. शिवाचार्यः, चन्द्रशेखरः, १९९६, शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः, वाराणसी : जङ्गमवाणीमठः, शैव-भारतीशोधप्रतिष्ठानम्।
5. डॉ. सुशीला 'कमलेश', १९७२, शक्ति-भाष्य का अध्ययन, वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
6. उपाध्याय, बलदेव (प्रधान सम्पादक), १९९६, संस्कृत-वाङ्मय का बृहद् इतिहास (दशम-खण्ड, वेदान्त), लखनऊ : उत्तर प्रदेश संस्कृत संस्थान।
7. शर्मा, राममूर्ति, २००८, भारतीय दर्शन की चिन्तनधारा, दिल्ली : चौखम्भा ओरियन्टालिया।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.2: वैष्णवदर्शनानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैष्णवदार्शनिकसम्प्रदायानां परिचयज्ञानम्।
2. विविधवैष्णवदर्शनेषु प्रतिपादितप्रमाणस्वरूपावगमनम्।
3. वैष्वणदर्शनेषु प्रतिपादिततत्त्वानाम् अवबोधः।
4. वैष्णवदर्शनेषु सूचितानां मुक्त्युपायानाम् अधिगमः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैष्णवदार्शनिकसम्प्रदायानाम् उपस्थापने समर्थाः भविष्यन्ति।
2. विविधवैष्णवदर्शनेषु निरूपितानां प्रमाणानां प्रतिपादने योग्याः भविष्यन्ति।
3. वैष्वणवदर्शनेषु प्रतिपादितानां जीवेश्वरजगदादितत्त्वानाम् उपपादने समर्थाः भविष्यन्ति।
4. वैष्णवदर्शनेषु सूचितान् मुक्त्युपायान् बोधयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.2	वैष्णवदर्शनानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वैष्णवदर्शनसम्प्रदायपरिचयः। **श्रेयोऽङ्कः १**

- विशिष्टाद्वैतसम्प्रदायः।
- द्वैतसम्प्रदायः।
- द्वैताद्वैतसम्प्रदायः।
- शुद्धाद्वैतसम्प्रदायः।
- अचिन्त्यभेदाभेदसम्प्रदायः।
- अक्षरपुरुषोत्तमसम्प्रदायः।

अन्वितिः २. वैष्णवदर्शनस्य ज्ञानमीमांसा। **श्रेयोऽङ्कः १**

- विशिष्टाद्वैतदर्शने ज्ञानमीमांसा।
- द्वैतवेदान्तदर्शने ज्ञानमीमांसा।

- द्वैताद्वैतवेदान्तदर्शने ज्ञानमीमांसा।
- शुद्धाद्वैतवेदान्तदर्शने ज्ञानमीमांसा।
- अचिन्त्यभेदाभेददर्शने ज्ञानमीमांसा।
- अक्षरपुरुषोत्तमदर्शने ज्ञानमीमांसा।

अन्वितिः ३. वैष्णवदर्शनस्य तत्त्वमीमांसा। **श्रेयोऽङ्कः १**

- विशिष्टाद्वैतदर्शने तत्त्वमीमांसा।
- द्वैतवेदान्तदर्शने तत्त्वमीमांसा।
- द्वैताद्वैतवेदान्तदर्शने तत्त्वमीमांसा।
- शुद्धाद्वैतवेदान्तदर्शने तत्त्वमीमांसा।
- अचिन्त्यभेदाभेददर्शने तत्त्वमीमांसा।
- अक्षरपुरुषोत्तमदर्शने तत्त्वमीमांसा।

अन्वितिः ४. वैष्णवदर्शनेषु मोक्षप्राप्त्युपायाः। **श्रेयोऽङ्कः १**

- विशिष्टाद्वैतदर्शने मोक्षप्राप्त्युपायाः।
- द्वैतवेदान्तदर्शने मोक्षप्राप्त्युपायाः।
- द्वैताद्वैतवेदान्तदर्शने मोक्षप्राप्त्युपायाः।
- शुद्धाद्वैतवेदान्तदर्शने मोक्षप्राप्त्युपायाः।
- अचिन्त्यभेदाभेददर्शने मोक्षप्राप्त्युपायाः।
- अक्षरपुरुषोत्तमदर्शने मोक्षप्राप्त्युपायाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माधवाचार्य, (2008), सर्वदर्शनसंग्रह (हिन्दी व्याख्या: उमाशंकर शर्मा), वाराणसी : चौखम्बा विद्याभवन।
2. त्रिपाठी, रामशरण, (1972), ब्रह्मसूत्र प्रमुख भाष्य पंचक समीक्षणम्, वाराणसी : चौखम्बा संस्कृत सीरीज़ ऑफिस।
3. श्रीनिवासाचार्य, (1961), यतीन्द्रमतदीपिका. मद्रास।
4. पद्मनाभसूरि, (2009), मध्वसिद्धान्तसार (पदार्थसंग्रह सहित). बेंगलुरु : द्वैत वेदान्त अध्ययन एवं शोध प्रतिष्ठान ।
5. उपाध्याय, बलदेव,(1996), संस्कृत वाङ्मय का बृहद् इतिहास (दशम खण्ड—वेदान्त), लखनऊ : उत्तर प्रदेश संस्कृत संस्थान।
6. स्वामिभद्रेशदासः, (2022), स्वामिनारायणसिद्धान्तसारः, अहमदाबाद : स्वामिनारायण-अक्षरपीठम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. नरसिंहाचार्यपुरोहितः, (2004), प्रमाणमीमांसा (मध्वमतानुसार), श्रीगुरुसार्वभौम संस्कृत विद्यापीठम्।
2. आनन्दतीर्थः (मध्वाचार्य), (2011), विष्णुतत्त्वविनिर्णय. बैंगलोर : द्वैत वेदान्त स्टडीज़ एंड रिसर्च फाउंडेशन, ।
3. गोस्वामी, गिरिधर, (1888), शुद्धाद्वैत मार्तण्ड (सम्पा. सत्यनारायण मिश्र), वाराणसी : वाराणसेय संस्कृत विश्वविद्यालय।
4. नारायण के, (1990), माध्व दर्शन, आसनसोल : बंगाल, इण्डोलॉजिकल रिसर्च सेंटर।
5. चतुर्वेदी कृष्णकान्त, (1980), द्वैत वेदान्त का तात्त्विक अनुशीलन, दिल्ली : विद्याप्रकाशन मन्दिर।
6. भट्टाचार्य माला, (2004), वल्लभाचार्य के दार्शनिक सिद्धान्त, आगरा : बी.एस. शर्मा एंड ब्रदर्स।
7. रामकृष्ण, (1960), ब्रह्मसूत्र के वैष्णव भाष्यों का तुलनात्मक अध्ययन, आगरा : विनोद पुस्तक मन्दिर।
8. लता सुमन, (2000), विशिष्टाद्वैत की आचार-मीमांसा, नई दिल्ली : परिमल पब्लिकेशन्स।
9. शर्मा वाचस्पति, (1995), अणुभाष्य: एक समीक्षात्मक अध्ययन, दिल्ली : ईस्टर्न बुक लिंकर्स।
10. शास्त्री प्रभाकर, (2002), भगवान् निम्बार्काचार्य सिद्धान्त, उपासना एवं आचार्य-परम्परा. जयपुर : रचना प्रकाशन।
11. त्रिभुवनदास, (2013), विशिष्टाद्वैत वेदान्त का विस्तृत विवेचन. दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।
12. भद्रेशदास, (2025), स्वामिनारायणसिद्धान्तसुधा, अहमदाबाद् : स्वामिनारायण-अक्षरपीठम्।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.3: शाब्दबोधविमर्शः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मीमांसादर्शनानुगुणं शाब्दबोधप्रक्रियायाः अवबोधनम्।
2. न्यायदर्शनानुसारं शब्दार्थस्वरूपप्रकाशनम्।
3. व्याकरणशास्त्रानुगुणं पदपदार्थावबोधनम्।
4. अलङ्कारशास्त्रदृष्ट्या शब्दार्थभेदस्वरूपयोः बोधनम्।
5. विविधशास्त्रेषु निरूपितायाः शाब्दबोधप्रक्रियायाः तुलनात्मकम् अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयदार्शनिकदृष्ट्या शाब्दबोधप्रक्रियायाः गहनस्वरूपविवेचने शक्ताः भविष्यन्ति।
2. मीमांसाशास्त्रानुसारं शब्दार्थस्वरूपविवेचने समर्थाः भविष्यन्ति।
3. न्यायदर्शनदिशा पदपदार्थविमर्शे गतिः भविष्यति।
4. व्याकरणशास्त्रदृष्ट्या शब्दार्थयोः तात्त्विकस्वरूपं विज्ञाय गूढविवेचने निपुणाः भविष्यन्ति।
5. अलङ्कारशास्त्रदिशा पदपदार्थयोः भेदान् ज्ञात्वा इतरशास्त्रेभ्यः वैशिष्ट्यकथने शक्ताः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.3	शाब्दबोधविमर्शः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मीमांसादर्शने शाब्दबोधः। **श्रेयोऽङ्कः १**

- मीमांसादर्शने शब्दस्वरूपम्।
- शब्ददेवतावादः।
- शब्दार्थविचारः।
- शब्दार्थसम्बन्धविचारः।
- शब्दनित्यतावादः।
- भावनाविशेष्यकशाब्दबोधः।
- आख्यातार्थविचारः।

- लिङर्थविचार:।
- शाब्दबोधप्रक्रिया - अभिहितान्वयवाद:, अन्विताभिधानवाद:।

अन्वितिः २. न्यायदर्शने शाब्दबोध:। **श्रेयोऽङ्कः १**

- न्यायदर्शने शब्दस्वरूपम्।
- शब्दार्थविचार:।
- शब्दार्थसम्बन्धविचार:।
- शक्तिग्रह:।
- आकाङ्क्षा।
- योग्यता।
- सन्निधि:।
- शाब्दबोधप्रक्रिया।

अन्वितिः ३. व्याकरणशास्त्रे शाब्दबोध:। **श्रेयोऽङ्कः १**

- व्याकरणशास्त्रे शब्दस्वरूपम्।
- चतुष्टयी शब्दानां प्रवृत्ति:।
- शब्दार्थसम्बन्धविचार:।
- धात्त्वर्थविचार:।
- तिङर्थविचार:।
- शाब्दबोधप्रक्रिया।

अन्वितिः ४. अलङ्कारशास्त्रे शाब्दबोध:। **श्रेयोऽङ्कः १**

- अलङ्कारशास्त्रे शब्दस्वरूपं भेदाश्च।
- अर्थभेदा: - वाच्यलक्ष्यव्यङ्ग्या:।
- शब्दार्थसम्बन्धविचार:।
- अभिधा।
- लक्षणा।
- व्यञ्जना।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. ताताचार्य:, एन.एस. रामानुज:, (2005), शाब्दबोधमीमांसा, नवदेहली : राष्ट्रियसंस्कृतसंस्थानम्।
2. भट्टाचार्य:, विश्वनाथ:, न्यायसिद्धान्तमुक्तावली, वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।
3. कौण्डभट्ट:, (2004), वैयाकरणभूषणसार:, वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।
4. भर्त्तृहरि:, (2015) वाक्यपदीयम् - ब्रह्मकाण्डम्, वाराणसी : चौखम्बा भारती एकेडमी।
5. आपदेव:, मीमांसान्यायप्रकाश:, नई दिल्ली : श्रीलालबहादुरशास्त्रीसंस्कृतविद्यापीठम्।

6. मम्मटाचार्यः, (2015), काव्यप्रकाशः, वाराणसी : चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. शर्मा, बालकृष्ण, काव्यप्रकाश का दार्शनिक धरातल, नई दिल्ली : प्रतिभा प्रकाशन।
2. Bilimoria, Purusottama, (1988), Sabdapramana:Word and Knowledge, London: Kluwer Academic Publishers.

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.4: आधुनिकभारतीयदर्शनानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. स्वामिविवेकानन्दस्य व्यावहारिकवेदान्तदर्शनं परिज्ञानम्।
2. महर्षेः अरविन्दस्य जीवनदर्शनस्य मानवचेतनायाश्च अवबोधः।
3. श्रीरविन्द्रनाथठाकुरस्य मानवधर्मस्य राष्ट्रवादस्य च प्रतिपादनम्।
4. श्रीकृष्णचन्द्रभट्टाचार्यस्य दर्शने स्वराजचिन्तनस्य अवगमनम्।
5. सर्वपल्लीराधाकृष्णवर्यस्य दार्शनिकसिद्धान्तानां परिचयप्रदानम्।
6. जे. कृष्णमूर्तिवर्यस्य स्वातन्त्र्यचिन्तनस्य निरूपणम्।
7. गान्धिदर्शनस्य सिद्धान्तानां बोधप्राप्तिः।
8. नवबुद्धवादविषये भीमराव-अम्बेडकरस्य चिन्तनस्य प्रबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आधुनिकदार्शनिकानां परिचयपुरस्सरं तेषां सिद्धान्तानां प्रतिपादने च समर्थाः भविष्यन्ति।
2. मानवधर्मस्य राष्ट्रवादचिन्तनस्य परिज्ञानेन राष्ट्रधर्मपरायणाः भविष्यन्ति।
3. भिन्नानां दार्शनिकसिद्धान्तानां विश्लेषणं कर्तुं शक्ष्यन्ति।
4. सत्य-अहिंसादि नैतिकमूल्यानाम् अभिज्ञानेन समर्थसमाजनिर्माणाय चिन्तयितुं शक्ष्यन्ति।
5. पारम्परैकदर्शनैः सह आधुनिकभारतीयदर्शनसिद्धान्तानां तुलनात्मकं विवेचनं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.4	आधुनिकभारतीय-दर्शनानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- स्वामिविवेकानन्ददृशा व्यावहारिकजीवने वेदान्तस्य उपादेयता।
- स्वामिविवेकानन्दस्य व्याख्यानचतुष्टयम्।
- स्वामिविवेकानन्ददर्शने सार्वभौमिकधर्मः।
- स्वामिविवेकानन्ददर्शने राजयोगः।

- अरविन्ददर्शने मानवचेतनायाः विकासः।
- अरविन्ददर्शने मनस्तत्त्वम् अतिमनस्तत्त्वं च।
- अरविन्ददर्शने समग्रयोगः।
- महर्षेः अरविन्दस्य जीवनदर्शनम्।
- राष्ट्रवादस्य अवधारणा।

अन्वितिः २. **श्रेयोऽङ्कः १**

- श्रीरविन्द्रनाथठाकुरस्य मानवधर्मः राष्ट्रवादस्य अवधारणा च।
- श्रीरविन्द्रनाथठाकुरस्य शिक्षादर्शनम्।
- श्रीकृष्णचन्द्रभट्टाचार्यस्य दर्शने स्वराजचिन्तनम्।
- श्रीकृष्णचन्द्रभट्टाचार्यस्य दर्शने मायावादः।
- सर्वपल्लीराधाकृष्णवर्यस्य जीवनदृष्टिः।
- सर्वपल्लीराधाकृष्णवर्यस्य सार्वभौमिकधर्मसङ्कल्पना।

अन्वितिः ३. परमेश्वरविरचितं ग्रहणमण्डनम्। **श्रेयोऽङ्कः १**

- जे. कृष्णमूर्तिवर्यस्य विचारप्रत्ययः।
- जे. कृष्णमूर्तिवर्यस्य स्वातन्त्र्यचिन्तनम्।
- आत्मतत्त्वविषये जे. कृष्णमूर्तिवर्यस्य दृष्टिः।
- गान्धिदर्शनम् – सत्यम्, अहिंसा, सत्याग्रहः, स्वराजः।
- भीमराव-अम्बेडकरस्य नवबुद्धवादः।

अन्वितिः ४. नीलकण्ठविरचितः गोलसारः। **श्रेयोऽङ्कः १**

- श्रीरामावतारशर्मणः परमार्थदर्शनम्।
- श्रीगोविन्दचन्द्रपाण्डेयस्य भक्तिदर्शनविमर्शः।
- पण्डितदीनदयाल- उपाध्यायस्य एकात्ममानववादः।
- महर्षेः दयानन्दस्य त्रैतवादः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. स्वामि विवेकानन्द, व्यावहारिक जीवन में वेदान्त, (1959), नागपुर : श्री रामकृष्ण आश्रम वन्तोली।
2. https://share.google/8UjAc0BA5hBfHdHUX

3. रवीन्द्र, श्री अरविन्द जीवन और दर्शन, (1999), पाण्डिचेरी : श्री अरविन्द सोसाइटी।
4. पाठक, प्रो. पी. आर., रवीन्द्र नाथ टैगोर का शिक्षा दर्शन, दिल्ली : कनिष्क पब्लिशर्स डिस्ट्रीब्यूटर्स।
5. D.K Bhattacharya, Fundamentals of K.C. Bhattachary's Philosophy, (2016), Delhi: D.K. Print world Pvt. Ltd.
6. Radhakrishnan, Sarvapalli, Search For Truth (1948), सालिगराम शर्मा (अनुवादक), सत्य की खोज आगरा : शिवलाल अग्रवाल एण्ड कम्पनी लिमिटेड।
7. J. Krishnamurti, Total Freedom The Essential Krishnamurti, Bengaluru: Krishnamurti Foundation India.
8. मिश्र, जगदीश चन्द्र, भारतीय दर्शन (2012), वाराणसी : चौखम्बा सुरभारती वाराणसी।
9. दयानन्द सरस्वती, सत्यार्थ प्रकाश (2008), दिल्ली : आर्ष साहित्य प्रचार ट्रस्ट।
10. श्रीरामावतार शर्मा, जनार्दन शास्त्री पाण्डेय (सम्पादक), परमार्थदर्शनम् (1994), दिल्ली : मोतीलाल बनारसीलाल पब्लिशर्स प्राइवेट लिमिटेड।
11. पाण्डेय, श्रीगोविन्दचन्द्र, भक्तिदर्शनविमर्शः (1991), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालय।

सहायकाः ग्रन्थाः (Additional Readings)

1. डॉ. शशिबाला गौड, दर्शनशास्त्रस्येतिहासः (2021), वाराणसी : चौखम्बा सुरभारती।
2. विवेकानन्दसाहित्यसंचयन, (2017) नागपुर : श्री रामकृष्ण मठ।
3. सक्सेना, डॉ. लक्ष्मी, समकालीन भारतीयदर्शन, लखनऊ : उत्तरप्रदेश हिन्दी संस्थान।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

चितस्वशास्त्रविषयः (DSE) 2.क.1: तुलनात्मकदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विविधदर्शनप्रस्थानेषु प्रमाणानां तुलनात्मकं विचारः।
2. प्रामाण्यवादविषये तुलनात्मकं विमर्शः।
3. विविधदर्शनप्रस्थानेषु प्रतिपादितानां तत्त्वानां तुलनात्मकं प्रतिपादनम्।
4. विविधदर्शनप्रस्थानेष्वागतानां कर्मवाद-ख्यातिवाद-शाब्दबोधादिसिद्धान्तानां तुलनात्मकमवगमनम्।
5. श्रीमद्भगवद्गीतायाः कर्मसिद्धान्तस्य परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. तुलनात्मकमध्यनेन प्रमाणानां विशिष्टज्ञानं प्राप्स्यन्ति।
2. प्रामाण्यवादस्य स्पष्टज्ञानमवाप्स्यन्ति।
3. विविधदर्शनप्रस्थानेषु प्रतिपादितानां तत्त्वानां तुलनात्मकं ज्ञानेन तत्त्वजिज्ञासाविषयकं ज्ञानमवगमिष्यन्ति।
4. विविधदर्शनप्रस्थानेष्वागतानां विविधसिद्धान्तानामवबोधपुरस्सरं विश्लेषणं शक्ष्यन्ति।
5. श्रीमद्भगवद्गीतायाः कर्मसिद्धान्तस्य आधुनिकदार्शनिकानां दृष्ट्या अवबोधं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.1	तुलनात्मकदर्शनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. विविधदर्शनप्रस्थानानां ज्ञानमीमांसायाः तुलनात्मकम् अध्ययनम्। श्रेयोऽङ्कः १

- प्रमाणसामान्यलक्षणानां तुलनात्मकम् अध्ययनम्।
- प्रमाणविशेषलक्षणानां तुलनात्मकम् अध्ययनम्।
- प्रमाणानां सङ्ख्याविषये तुलनात्मकम् अध्ययनम्।
- विविधदर्शनेषु प्रामाण्यवादः।

अन्वितिः २. विविधदर्शनप्रस्थानानां तत्त्वमीमांसायाः तुलनात्मकम् अध्ययनम्। श्रेयोऽङ्कः १

- विविधदर्शनप्रस्थानेषु आत्मनः स्वरूपम्।

- विविधदर्शनप्रस्थानेषु सृष्टिसंहारप्रक्रियायाः तुलनात्मकम् अध्ययनम्।
- विविधदर्शनप्रस्थानेषु ईश्वरः।
- विविधदर्शनप्रस्थानेषु मोक्षविचारः।

अन्वितिः ३. विविधदर्शनप्रस्थानानाम् प्रसिद्धसिद्धान्तानां तुलनात्मकम् अध्ययनम्। श्रेयोऽङ्कः १

- कर्मवादः (स्वभाववादः, साङ्ख्ययोगस्य कर्मसिद्धान्तः, कर्मेति मीमांसकाः)
- ख्यातिवादः।
- शाब्दबोधः।
- विविधदर्शनप्रस्थानेषु आचारमीमांसा।

अन्वितिः ४. श्रीमद्भगवद्गीता-कर्मसिद्धान्तस्य आधुनिकदार्शनिकदृष्ट्या तुलनात्मकमध्यनम्। श्रेयोऽङ्कः १

- निष्कामकर्मयोगः।
- महात्मागान्धिनः अनासक्तियोगः।
- बालगङ्गाधरतिलकस्य गीतारहस्यम्।
- श्रीअरविन्दस्य गीतानिबन्धः (Essays on the Geeta)

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. सांकृत्यायन, राहुल, (1944), दर्शन दिग्दर्शन, इलाहाबाद : किताब महल।
2. उपाध्यायः, आचार्य बलदेव, (1999), संस्कृत साहित्य का बृहत् इतिहास, न्यायखण्ड, वेदान्तखण्ड, लखनऊ : उत्तर प्रदेश संस्कृत संस्थान।
3. शतपथी, डॉ. सावित्री, सृष्टिविमर्शः, (2008), दिल्ली : राष्ट्रिय संस्कृत संस्थान।
4. माधवाचार्यः,प्रो. उमाशङ्कर ऋषि, (2008), सर्वदर्शनसङ्ग्रहः, वाराणसी : चौखम्बा विद्या भवनम।
5. गान्धी, मोहनदास करमचंद, (1976) अनासक्तियोगः, कलकत्ता : सीताराम सेखसरिया शुद्ध खादी भण्डार।
6. तिलक, बाल गंगाधर, (1915) गीतारहस्यम्, पुणे : केसरी व चित्रशाला पुणे।
7. श्री अरविन्द, Essay on the Gita, (1997) पांडेचेरी : श्री अरविन्द आश्रम प्रेस।

सहायकाः ग्रन्थाः (Additional Readings)

1. डॉ. विजयारानी, प्रमाण एवं प्रामाण्य विमर्श, दिल्ली : परिमल पब्लिकेशन।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

चितस्वशास्त्रविषयः (DSE) 2.क.2: पाश्चात्यदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पाश्चात्यदर्शनस्य सामान्यपरिचयः, उद्भवविकासपरम्परायाः अवबोधनम्।
2. पाश्चात्यदर्शनपरम्परामवगम्य तत्प्रमुखसिद्धान्तानामवगमनम्।
3. मध्यकालीनपाश्चात्यदार्शनिकानां परिचयप्राप्तिः।
4. आधुनिकपाश्चात्यदार्शनिकानां विमर्शः।
5. पाश्चात्यदर्शनस्य प्रमुखसिद्धान्तानां विवेचनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. पाश्चात्यदर्शनस्य विकासक्रमं अवगन्तुं शक्ष्यन्ति।
2. पाश्चात्यदार्शनिकानां परिचयं प्राप्स्यन्ति।
3. पाश्चात्यदार्शनिकसिद्धान्तान् अधिगम्य प्राच्यदर्शनवादैः सह तुलनात्मकं विवेचनं कर्तुं समर्थाः भविष्यन्ति।
4. आधुनिकपाश्चात्यदार्शनिकानां विमर्शं प्राप्स्यन्ति।
5. पाश्चात्यदार्शनिकसिद्धान्तानां विश्लेषणं कृत्वा तेषामुपादेयत्वं प्रतिपादयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.2	पाश्चात्यदर्शनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. पाश्चात्त्यदर्शनम् (प्राचीनयुगस्य दर्शनम्) **श्रेयोऽङ्कः १**

- पाश्चात्यदर्शनस्य परिचयः उद्भवो विकासश्च।
- पाश्चात्यदार्शनिकाः – थेलीज, अनेक्जमेनीज, एनेक्जिमेडर, अनाक्जमेनीज, पाइथागोरस।
- पार्मेनाइडीज, हेराक्लिटस, जीनो, डेमोक्रिटस, सोफिस्ट्स।
- सेक्रोटीज्, प्लेटो, एरिस्टोटल।

अन्वितिः २. पाश्चात्त्यदर्शनम् (मध्ययुगस्य दर्शनम्) **श्रेयोऽङ्कः १**

- सन्त ऑगस्टाइन, सन्त एन्थेल्स, सन्त थॉमस एक्विनास।
- जॉन स्काटस एरिनेजा, एन्सेल्म, एलेबार्ड।

- टॉमस एक्विनस, डन्स स्कॉटस।

अन्वितिः ३. पाश्चात्त्यदर्शनम् (आधुनिकयुगस्य दर्शनम्) **श्रेयोऽङ्कः १**

- रेने डेकार्ट, स्पिनोजा, जान लॉक।
- बर्कले, डेविड ह्यूम, इम्मेनुइल कॉट।
- फ्रांसिस बेकन, लाइबनित्ज, हेगल।

अन्वितिः ४. पाश्चात्यदर्शनस्य प्रमुखवादाः। **श्रेयोऽङ्कः १**

- बुद्धिवादः – देकार्त, स्पिनोजा, लाइबनित्ज।
- अनुभववादः – जान लॉक, जार्ज बर्कले, डेविड ह्यूम।
- विज्ञानवादः - इम्मेनुइल कांट, शेलिंग,हेगल।
- प्रगमतावादः – विलियम जेम्स, जॉन ड्यूई।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. चक्रवर्ती, अरिंदम, (2005), आधुनिकप्रतीच्यप्रमाणमीमांसा, नई दिल्ली: राष्ट्रीय संस्कृत अकादमी।
2. डॉ. दयाकृष्ण, (2008), पाश्चात्य दर्शन का इतिहास (भाग-1, भाग-2), जयपुर : राजस्थान हिन्दी ग्रन्थ अकादमी।
3. श्रीरामचन्द्रुडु, पुल्लेल, (2010), पाश्चात्यतत्त्वशास्त्रेतिहासः, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
4. शर्मा, चन्द्रधर, (2010), पाश्चात्य दर्शन, दिल्ली : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. जड्डीपाल, डॉ. व्ही. व्ही, (2000) तर्कशास्त्रप्रभावमीमांसा, तिरुपति : राष्ट्रीय संस्कृत विद्यापीठ।
2. जायसवाल, शेखर कुमार, (2010), पाश्चात्य दर्शन एक सिंहावलोकन, वाराणसी : चौखम्बा विद्याभवन।
3. निगम, शोभा, (2008) यूनानी दार्शनिक चिंतन, मध्यप्रदेश : मध्यप्रदेश हिन्दी ग्रन्थ अकादमी।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 2.क.3: जैनदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. जैनदर्शनस्य मूलतत्त्वानां सम्यक्बोधनम्।
2. जैनदर्शनस्य आचार्यपरम्परायाः ग्रन्थपरम्परायाश्च अध्ययनेन विकासपरम्परापरिबोधनम्।
3. जैनदर्शनस्य प्रमाण-प्रमेय-मोक्षस्वरूपाणां परिज्ञानम्।
4. वैदिकावैदिकदर्शनानां तुलनात्मकदृष्ट्या अवबोधनम्।
5. जैनदर्शनस्य प्रसिद्धसिद्धान्तानां सम्यक्बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दर्शनशब्दस्य व्युत्पत्तिं, अवैदिकपद्धतिषु दर्शनानां भेदं च व्याख्यातुं समर्थाः भविष्यन्ति।
2. जैनदर्शनसिद्धान्तानां वर्णनं कर्तुं समर्थाः भविष्यन्ति।
3. जैनदर्शनानुसारं जगतः स्वरूपं वर्णयितुं शक्ष्यन्ति।
4. जैनदर्शनानुसारं प्रमाणप्रमेयस्वरूपं सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. दर्शनान्तरैः सह जैनदर्शनस्य सिद्धान्तानां तुलनात्मकविवेचनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.3	जैनदर्शनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. जैनदर्शनपरम्परा। **श्रेयोऽङ्कः १**

- जैनदर्शनस्येतिहासः।
- आचार्यपरम्परा – आचार्यः भद्रबाहुः, धरसेनाचार्यः, कुन्दकुन्दाचार्यः, उमास्वामी, समन्तभद्राचार्यः, आचार्यः अकलङ्कः, हेमचन्द्राचार्यः।

अन्वितिः २. जैनदर्शनस्य प्रमाणमीमांसाः। **श्रेयोऽङ्कः १**

- प्रमाणसामान्यस्वरूपम्।
- प्रमाणभेदनिरूपणम्- प्रत्यक्षं परोक्षं च।
- हेत्वाभासाः।

- ज्ञानभेदाः - मतिज्ञानं, श्रुतज्ञानं, अवधिज्ञानं, मन:पर्यायज्ञानं केवलज्ञानञ्च।

अन्वितिः ३. जैनदर्शनस्य तत्त्वमीमांसा। **श्रेयोऽङ्कः १**

- तत्त्वलक्षणम्।
- जैनदर्शनानुसारं तत्त्वमीमांसा – जीव-अजीव-आस्रव-बन्ध-संवर-निर्जरा-मोक्षतत्त्वानां निरूपणम्।
- स्याद्वाद:।
- अनेकान्तवादः।

अन्वितिः ४. जैनदर्शनस्य आचारमीमांसा। **श्रेयोऽङ्कः १**

- रत्नत्रयम् - सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यग्चारित्र्यम्।
- पञ्चमहाव्रतानि - अहिंसा, सत्यम्, अस्तेय:, अपरिग्रह:, ब्रह्मचर्यम्।
- जैनदर्शने मोक्षविचार: - प्रकृति-प्रदेश-स्थिति-अनुभाग-बन्धभेदा:।
- ईर्या-भाषा-एषणा-आदान-उत्सर्गपञ्चसमितीनां मनोवचनकायगुप्तीनां च विवेचनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माधवाचार्यः (विद्यारण्यः), (2010), सर्वदर्शनसंग्रहः, वाराणसी : चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. नागसम्पिगे, ए. वि., अडिगः, शङ्करनारायणः, (2012), षड्दर्शनसारः, बेङ्गलूरु : पूर्णप्रज्ञसंशोधनमन्दिरम्।
2. मिश्रः, प्रो. गोपबन्धु, (2020), शास्त्रपरिचायिका, वेरावलम् : श्रीसोमनाथसंस्कृतविश्वविद्यालयः।
3. उमास्वामी, आचार्य, (2005), तत्त्वार्थसूत्र, जयपुर : पं. टोडरमल स्मारक ट्रस्ट।
4. उमास्वामी, आचार्य,(1991), तत्त्वार्थाधिगमसूत्रम्, जोधपुर : श्री सुशील साहित्य प्रकाशन|
5. यशोविजयगणि, (1964), जैन तर्कभाषा, अहमदनगर : श्री त्रिलोक रत्न स्थानकवासी जैन धार्मिक परीक्षा बोर्ड।
6. आचार्य अमृतचन्द्र, (2022), पुरुषार्थसिद्धि उपाय, जयपुर : पं. टोडरमल स्मारक ट्रस्ट।
7. त्रिपाठी, शिवदत्तः, भारतीय दर्शनों का इतिहास, वाराणसी : चौखम्बा विद्या भवन।
8. उपाध्याय, बलदेवः, भारतीयदर्शन - साङ्ख्य और योग, प्रयागराज : हिंदी साहित्य सम्मेलन।
9. दासगुप्त, सुरेन्द्रनाथः, भारतीयदर्शन (भाग–1), अनुवादक: - राधाकृष्ण शर्मा, दिल्ली : भारतीयज्ञानपीठ दिल्ली।
10. उपाध्याय , बलदेव. (2002). भारतीय दर्शन . वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
11. गुप्त, जे. एल. चैतन्य,' सम्पादक. (2004). षड्दर्शनसूत्रसङ्गहः नई दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान|
12. Chattopadhyay, Debiprasad, Lokayata – A Study in Ancient Indian Materialism, New Delhi, People`s Publishing House.

13. गैरोला, वाचस्पति, (1962), भारतीय दर्शन, इलाहाबाद : लोकभारती प्रकाशन।
14. सेनापतिः, सुकान्तकुमारः, दर्शनार्णवः, (2024), नई दिल्ली : केन्द्रीयसंस्कृतविश्वविद्यालयः।

One Year PG in

Veda-Paurohitya-Karmakandam

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातकोत्तरकार्यक्रमः – वेद-पौरोहित्य-कर्मकाण्डम्

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली - 110002

Curriculum Development Committee for One Year PG (Veda-Paurohitya-Karmakandam)

Prof. Viroopaksha V Jaddipal
Chairperson of the committee and Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain ✉vvjaddipal@gmail.com

Prof. Manoj Kumar Mishra
HoD. of Veda, Paurohitya & Karmakanda, Central Sanskrit University, New Delhi,
✉ vedanga.mkmishra@gmail.com

Shri Satyam Shukla
Rigveda Adhyapaka, Rashtriya Adarsh Ved Vidyalaya, Maharshi Sandipani Rashtriya Vedavidya Pratishthan -Ujjain ✉ rigvedisatyam@gmail.com

Shri Chidanand Shastri
Rigveda Adhyapaka, Rashtriya Adarsh Ved Vidyalaya, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain ✉ shastri.cg@gmail.com

Shri Saurav Nautiyal
Rigveda Adhyapaka, Rashtriya Adarsh Ved Vidyalaya, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain ✉ saurabh96.delhi@gmail.com

Dr. D. Dayanath
Convenor of the committee and Asst. Professor (Veda), Central Sanskrit University, New Delhi
✉ sridayanath@gmail.com

विषयसूची

कार्यक्रमस्य परिचयः **1**

कार्यक्रमस्य उद्देश्यानि **2**

कार्यक्रमस्य परिणामाः **3**

योग्यतासंसूचकानि **4**

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् **5**

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् **6**

प्रधानपाठ्यक्रमाणां सञ्चयः **7**

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः **7**

प्रथमसत्रार्द्धः (Semester - 1) **8**

प्रधानः पाठ्यक्रमः (Major) 1.1: सभाष्यसूक्ताध्ययनम् - 1 8

प्रधानः पाठ्यक्रमः (Major) 1.2: दर्शपूर्णमास-मन्त्रभाष्यम् 10

प्रधानः पाठ्यक्रमः (Major) 1.3: शुक्लयजुःप्रातिशाख्यम् (वर्णोत्पत्त्यादिविचारः स्वरनियमाश्च) 12

प्रधानः पाठ्यक्रमः (Major) 1.4: दर्शपूर्णमासप्रकरणं (कात्यायनश्रौतसूत्रे द्वितीयाध्यायः), कातीयेष्टिदीपकश्च 14

द्वितीयसत्रार्द्धः (Semester-2) **17**

प्रधानः पाठ्यक्रमः (Major) 2.1: शतपथब्राह्मणभाष्ये प्रथमद्वितीयाध्यायौ 17

प्रधानः पाठ्यक्रमः (Major) 2.2: सभाष्यसूक्ताध्ययनम् – 2 19

प्रधानः पाठ्यक्रमः (Major) 2.3: अग्न्याधान-अग्निहोत्रमन्त्रभाष्यम् 21

प्रधानः पाठ्यक्रमः (Major) 2.4: उपनिषदाम् अध्ययनम् (शाङ्करभाष्यसहितम्) 23

चितस्वशास्त्रविषयाः **25**

प्रथमसत्रार्द्धः (Semester - 1) **26**

चितस्वशास्त्रविषयः (DSE) 1.क.1: वैदिकवाङ्मयविस्तरः - 1 26

चितस्वशास्त्रविषयः (DSE) 1.क.2: मनुस्मृतिः (द्वितीयाध्यायः) 28

चितस्वशास्त्रविषयः (DSE) 1.क.3: याज्ञवल्क्यस्मृतिः (आचाराध्यायः) 31

द्वितीयसत्रार्द्धः (Semester - 2) **34**

चितस्वशास्त्रविषयः (DSE) 2.क.1: वैदिकवाङ्मयविस्तरः - 2 (शिक्षादिषडङ्गानि) 34

चितस्वशास्त्रविषयः (DSE) 2.क.2: अर्थसङ्ग्रहः 36

चितस्वशास्त्रविषयः (DSE) 2.क.3: वैदिकदेवतावादः वेदविज्ञानं च 40

कार्यक्रमस्य परिचयः

(Introduction of the Program)

अस्य कार्यक्रमस्य उद्देश्यं तावत् नवीनदृष्टिकोणयुक्तानां छात्राणां सर्वेषां वेदस्य स्नातकोत्तरपाठ्यक्रमेषु उन्मुखीकरणम् अस्ति। अयं पाठ्यक्रमः **Learning Outcome-based Curriculum Framework (LOCF)** इत्यस्य आधारेण निरूपितःअस्ति, यःविविधविश्वविद्यालयेषु अनुसर्तुं योग्यः अस्ति।

LOCF - पद्धतिः स्नातकोत्तरस्तरे लक्ष्यकेन्द्रितस्य पाठ्यक्रमस्य प्रस्तुतये उपकरोति। इयं पद्धतिः "छात्रकेन्द्रितायाःशिक्षण-अधिगमप्रक्रियायाः आविष्करणे अत्युपयुक्ता भवति इति अभिप्रायेण निरूपिता अस्ति। एषा पद्धतिः छात्राणाम् अधिगमानुभवे स्पष्टतां दार्ढ्यं च समुत्पादयति। अनया पद्धत्या छात्राः यथेच्छं स्वीयपाठ्यक्रमे संलग्नाःभवन्ति। ईदृशः स्नातकोत्तरपाठ्यक्रमः छात्राणां न केवलं वेदविषये शिक्षणं प्रददाति अपितु व्यक्तित्वविकसनेन सह उपजीविकां कल्पयति।

LOCF - पद्धतिः पाठ्यक्रमस्य स्वभावं स्वरूपं वा विस्तरेण वर्णयति अपि च पाठ्यक्रमस्य अध्ययनाद् यानि यानि फलानि प्राप्यन्ते, तान् अपि सूचयति। अनया पद्धत्या स्नातकोत्तरस्तरपाठ्यक्रमात् व्यज्यमानाः गुणाः निर्दिश्यन्ते। एते गुणाः स्वास्थ्यम्, भावनात्मकसंतुलनम्, समालोचनात्मकचिन्तनम्, सामाजिकन्यायः च औद्योगिककौशलानि भवन्ति। अयं कार्यक्रमः छात्रेषु निरन्तराध्ययनयोग्यतां, स्थिरजीवनं च जनयति। भारतीयदर्शनाध्ययनविषये दृष्टिकोणं च परिवर्तयति।

एम.ए. वेदः इत्यस्मिन् पाठ्यक्रमे विविधवैदिकविषयान् आधृत्य समीक्षात्मकानि, विमर्शात्मकानि, विशिष्टचिन्तनपराणि लेखनानि रचयितुं वैदिककार्यक्रमान् याग-होमादीन् वा आयोजयितुं स्रोतः समुपलभ्यते। अयं पाठ्यक्रमः अंतर्विषयात्मकपद्धतिम् अनुसरति यया छात्राः वेदस्य संक्षिप्तं, गूढं च परिचयं प्राप्नुवन्ति, ये च अन्यान्विषयान् अपि पठन्ति, तेषु विषयेषु अपि विशिष्टां जिज्ञासां प्राप्नुवन्ति। अयं पाठ्यक्रमः मानवजीवनकौशलेन, सामाजिकविज्ञानेन, अध्यात्मविज्ञानेन च सह सम्बन्धं स्थापयति। अनेन पाठ्यक्रमेण छात्राः वेदानां तदुपदिष्टकर्मणां च विश्लेषणे समस्या-समाधानयोरधिगमने च सामर्थ्यं सम्पादयन्ति।

एषः पाठ्यक्रमः छात्रेषु सर्वोत्तमं बौद्धिकसामर्थ्यं जनयितुं रचितः अस्ति। येन छात्रः व्यक्तित्वविकासं सामाजिकजीवनविकासं च आसादयितुं समर्थः भवेत्।

अयं पाठ्यक्रमः वेदाध्ययनस्य सामान्यरूपेण प्रचलितान् दृष्टिकोणान् आविष्कर्तुम् अन्यथाधारणां च अपाकर्तुं तद्द्वारा वेदाध्ययने छात्राणां रुचिं जनयितुं विविधवैदिकक्रियाणां तत्त्वम् अवगन्तुं संरचितः वर्तते। अयं कार्यक्रमः छात्राणाम् अधिकतमां मनोनुकूलतां (**flexibility**) कल्पयितुम् आयोज्यते।

अत्र मुख्यविषयान्तर्गतानि चतुर्दश (**Core Disciplinary papers**) 14 पत्राणि सन्ति, यानि वेदविषये मूलभूतं ज्ञानं, समीक्षात्मकं तार्किकं तुलनात्मकं ज्ञानं, विमर्शात्मकं विवेचनात्मकम् अध्ययनं च यथावत्प्रयच्छन्ति।

पाठ्यक्रमेऽस्मिन् बहवः विषयाः छात्राणां सौकर्यदृष्ट्या दत्ताः सन्ति । तेषां पत्राणां/विषयाणां माध्यमेन वैदिकतत्त्वागमबोधः सरलः स्यादिति उद्देश्यमासीत् ।

पाठ्यक्रमोऽयं न केवलं वेदानाम् अपितु वेदोपदिष्टकर्मणां ज्ञानं कौशलं च संवर्धयति । अन्येषु विषयेषु अपि आवश्यकानि कौशलानि संवर्धयति। एम.ए. वेदपाठ्यक्रमः अंतश्शास्त्रीयः बहुशास्त्रीयश्च । यः विविधविषयेषु विशेषज्ञानं प्राप्तुं सहायकः अस्ति् । यश्च अन्यविषयाणां सम्बद्धकौशलानां प्राप्त्युपायः। अनेन वेदस्य अध्ययनं कुर्वन् छात्रः तत्सम्बद्धविषयेभ्यः अपि यथायोग्यं ज्ञानं लभते।

स्वरूपं विस्तृतिः च (Nature and Scope)

एम.ए. वेदपाठ्यक्रमः एकवर्षीयः। अत्र द्वे सत्रार्द्धे भवतः। प्रति पत्रं श्रेयोऽङ्कचतुष्टयमितं अध्ययनाध्यापनमूल्याङ्कनकालः निश्चितो भवति । अस्मिन्पाठ्यक्रमे अध्यापनं अध्ययनं च सैद्धान्तिककक्षाभिः (**Lecture** व्याख्यानरूपेण) तथा प्रशिक्षणकक्षाभिः (**tutorial)** सह सम्पन्नं। पाठ्यक्रमः औपचारिकव्याख्यानैः सह अध्याप्यते**,** यत्र **PowerPoint** प्रस्तुतीनां**, audio-video** उपकरणानां च उपयोगः करणीयः। यथायोग्यमवसरः प्राप्तः चेत् अन्यानि शिक्षणसाधनानि अपि प्रयोक्तुं शक्यन्ते।

केषुचित्पाठ्येषु अतिरिक्तानि अपेक्ष्यानि भवन्ति**,** यथा – वृत्तचित्रदर्शनम् (**documentary),** चलनचित्रदर्शनम्**,** क्षेत्रकार्यं (**field work),** अभिलेखसंग्रहणम् (**archival work),** विविधविदुषां/संस्थानां दर्शनम् (**Interaction with Scholars and Visit to Gurukula/Yajnashala),** परियोजनायाः कार्यम् (**project work),** वैदिकयज्ञेषु भागग्रहणम् इत्यादीनि । एतानि नियमिताध्यापनसहितं सम्यक्समायोज्यन्ते ।

कार्यक्रमस्य उद्देश्यानि

(Program Objectives)

अस्य पाठ्यक्रमस्य उद्देश्यम् एवं प्रकारेण निर्दिष्टं भवति -

1. छात्रेभ्यः वैदिकपरम्परायाः ज्ञानस्य प्रदानम्।
2. एतत् ज्ञानं समाजस्य श्रेयसि कथम् उपयोगी भवति**,** इति शिक्षणम्।
3. वैदिकाः ऋषयः आचार्याश्च कथम् अनुसन्धानम् अकुर्वन्**,** कथं मीमांसादिशास्त्रमाश्रित्य वेदवाक्येषु विवाद-समाधानं कुर्वन्तीत्यस्य ज्ञानप्रापणम् ।
4. प्राचीनज्ञानपरम्परायाः अध्ययनात् अधुनातनजीवनस्य निर्माणम् ।
5. अतीतवर्तमानयोः ज्ञानकर्मणोः परस्परं सम्बद्धतायाः ज्ञानप्रदानम् ।
6. छात्राणां चिन्तनकौशल-जीवनकौशल-विश्लेषणशक्ति-तार्किकचिन्तनानां वर्धनम् ।
7. अनुसन्धानाभिमुखदृष्टेः प्रदानम् ।
8. वैदिकस्वरस्य देवताविज्ञानस्य च शास्त्रप्रमाणसहितम् अध्ययनम् ।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

कार्यक्रमस्य परिणामः – 1	**भारतीयमूलानि -** वैदिकपरम्परायाः मूलज्ञानं प्रदाय कुशलविश्लेषकचिन्तकानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 2	**भारतीयज्ञानपरम्परा** – भारतीयज्ञानपरम्परायै वेदस्य अभिन्नाङ्गत्वस्य अवबोधः।
कार्यक्रमस्य परिणामः – 3	**भविष्यवाद्युपागमः -** वेदेषु निपुणत्त्वेन छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 4	**भविष्यवाद्युपागमः** - वैदिकसिद्धान्तानां व्यावहारिकानुप्रयोगे कुशलान् छात्रान् निर्माय तेषां नैतिकतासंवर्धनम्।
कार्यक्रमस्य परिणामः – 5	**बहुशास्त्रीयम् -** वेदेषु प्रतिपादितान् लोकोपयोगिनः मौलिकान् नियमान् समाजे सप्रमाणं प्रतिपादयितुं समर्थानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 6	**वृत्तिप्रदानक्षमता -** छात्रान् व्यावसायिक-विश्लेषणात्मकप्रौद्योगिकी-कौशलेन सुसज्जितान् कृत्वा तेषां वृत्तिसामर्थ्यस्य वर्धनम्।

योग्यतासंसूचकानि

(QUALIFICATION DESCRIPTORS FOR SANSKRIT POST GRADUATES)

संस्कृतं किञ्चन क्षेत्रं भवति यत्र वयं सामाजिक-राजनैतिक-न्याय-नैतिकादीनां विभिन्नानां विश्वं प्रभावयतां पक्षाणाम् अध्ययनं कर्तुं प्रवृत्ताः भवेम। तदर्थम् अधोदत्तानि योग्यतासंसूचकानि स्वीकृतानि –

- संस्कृतस्य संस्कृतशास्त्राणाञ्च गहनतया अवबोधस्य प्रदर्शनम्।
- सरलमानकसंस्कृतेन समृद्धप्राचीनप्रज्ञावबोधाय ज्ञानस्य अनुप्रयोगः।
- संस्कृतशास्त्राणां (IKS) समकालीनज्ञानप्रणालीनां च विस्तृतज्ञानस्य प्रदर्शनम्।
- अर्थशास्त्र-राजनीति-न्याय-गणित-भौतिक-रसायन-विज्ञानादिविषयज्ञानोपेतस्य वेदस्य बहुशास्त्रियोपागमत्त्वेन प्रदर्शनम्।
- समकालीनविषयाणां व्यापकं ज्ञानं, चितक्षेत्रसम्बद्धः वैदुष्यपूर्णशोधः, समकालीनविषयावगमनाय आवश्यककौशलानां प्रविधीनां च प्रदर्शनम्।

पाठ्यक्रमस्य समुचितरीत्या समापनानन्तरं छात्राः वेदे स्नातकोत्तरपदवीम् (**M.A. Veda**) प्राप्नुवन्ति। अस्य विभागस्य वेदस्नातकाः विभिन्नज्ञानक्षेत्रेषु, औद्योगिकक्षेत्रेषु च संलग्नाः आत्मसंतोषजनकं कार्यं सम्पादयितुं समर्थाः भविष्यन्ति। ते वेदे प्रमुखानां ग्रन्थानां ज्ञानं सम्पाद्य वेदसम्बद्धैः विद्वत्संवादैः सह सम्बन्धं च स्थापयितुं शक्नुवन्ति। एषः ज्ञानप्रकारः वेदे शोधप्रवृत्तौ एकः दृढः आधारः भवति । अपि च विशिष्टविषयकौशलेन सह यानि जीवनोपयोगीनि कौशलानि - यथा तर्कशक्तिः, संवादकौशलम्, नूतना दृष्टिः, व्यक्तित्वविकसनं, मूल्याङ्कनबुद्धिः च इत्येतानि अपि वेदविषयाध्ययनेन विकसितानि भवन्ति। जटिलेऽस्मिन् जीवनसन्दर्भे मानवसमाजस्य उत्कर्षाय वैदिकतत्त्वानाम् अध्ययनं कुर्वन्तः एते छात्राः समृद्धं, फलप्रदम्, अर्थपूर्णं, शान्तिपूर्णं च जीवनं नेतुं समर्थाः भवन्ति।

अधोलिखिताः विकल्पाः वेदस्नातकोत्तरपाठ्यक्रमे प्रशिक्षितस्य छात्रस्य उद्योगावकाशान् सूचयन्ति—

- अध्यापनम् अनुसंधानञ्च।
- नीतिनिर्माणं शासनञ्च।
- धार्मिकसंस्थासु नियुक्तिः।
- मन्दिरेषु नियुक्तिः ।
- सार्वजनिकजीवनं जनप्रतिनिधित्वञ्च।
- पत्रकारितायां तथा समूहमाध्यमेषु कार्यम्।
- सामाजिकसेवा तथा सामाजिककार्यसम्बद्धकार्याणि।
- अभिलेखागारेषु, सङ्ग्रहालयेषु, पुरातत्त्व-अनुसन्धानक्षेत्रेषु च संलग्नता।
- प्रशासनिककार्येषु नियुक्तिः ।
- स्ववित्तोपार्जनसामर्थ्यस्य वर्धनम् ।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
सभाष्यसूक्ताध्ययनम् - 1	✓	✓	✓	✓	✓	✓	✓
दर्शपूर्णमास-मन्त्रभाष्यम्	✓	✓	✓	✓	✓	✓	✓
शुक्लयजुःप्रातिशाख्यम् (वर्णोत्पत्त्यादिविचारः स्वरनियमाश्च)	✓	✓	✓	✓	✓	✓	✓
दर्शपूर्णमासप्रकरणं (कात्यायनश्रौतसूत्रे द्वितीयाध्यायः), कातीयेष्टिदीपकश्च	✓	✓	✓	✓	✓	✓	✓
शतपथब्राह्मणभाष्ये प्रथमद्वितीयाध्यायौ	✓	✓	✓	✓	✓	✓	✓
सभाष्यसूक्ताध्ययनम् – 2	✓	✓	✓	✓	✓	✓	✓
अग्न्याधान-अग्निहोत्रमन्त्रभाष्यम्	✓	✓	✓	✓	✓	✓	✓
उपनिषदाम् अध्ययनम् (शाङ्करभाष्यसहितम्)	✓	✓	✓	✓	✓	✓	✓

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

PROGRAM OUTCOME MAPPING FOR MINOR COURSES

Course Name पाठ्यक्रमनाम	Rootedness भारतीय मूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
वैदिकवाङ्मयविस्तरः - 1	✓	✓	✓	✓	✓	✓	✓
मनुस्मृतिः (द्वितीयाध्यायः)	✓	✓	✓	✓	✓	✓	✓
याज्ञवल्क्यस्मृतिः (आचाराध्यायः)	✓	✓	✓	✓	✓	✓	✓
वैदिकवाङ्मयविस्तरः - 2 (शिक्षादिषडङ्गानि)	✓	✓	✓	✓	✓	✓	✓
अर्थसङ्ग्रहः	✓	✓	✓	✓	✓	✓	✓
वैदिकदेवतावादः वेदविज्ञानं च	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		प्रधानपाठक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 1.1: सभाष्यसूक्ताध्ययनम् - 1	4	600-699
2		प्रधानः 1.2: दर्शपूर्णमास-मन्त्रभाष्यम्	4	600-699
3		प्रधानः 1.3: शुक्लयजुःप्रातिशाख्यम् (वर्णोत्पत्त्यादिविचारः स्वरनियमाश्च)	4	600-699
4		प्रधानः 1.4: दर्शपूर्णमासप्रकरणं (कात्यायनश्रौतसूत्रे द्वितीयाध्यायः), कातीयेष्टिदीपकश्च	4	600-699
5	द्वितीयसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 2.1: शतपथब्राह्मणभाष्ये प्रथमद्वितीयाध्यायौ	4	600-699
6		प्रधानः 2.2: सभाष्यसूक्ताध्ययनम् – 2	4	600-699
7		प्रधानः 2.3: अग्न्याधान-अग्निहोत्रमन्त्रभाष्यम्	4	600-699
8		प्रधानः 2.4: उपनिषदाम् अध्ययनम् (शाङ्करभाष्यसहितम्)	4	600-699

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमवर्षीयाः चितस्वशास्त्रविषयकाः पाठ्यक्रमाः	चितस्वशास्त्रविषयः 1.क.1: वैदिकवाङ्मयविस्तरः - 1	4	600-699
2		चितस्वशास्त्रविषयः 1.क.2: मनुस्मृतिः (द्वितीयाध्यायः)	4	600-699
3		चितस्वशास्त्रविषयः 1.क.3: याज्ञवल्क्यस्मृतिः (आचाराध्यायः)	4	600-699
4	द्वितीयवर्षीयाः चितस्वशास्त्रविषयकाः पाठ्यक्रमाः	चितस्वशास्त्रविषयः 2.क.1: वैदिकवाङ्मयविस्तरः - 2 (शिक्षादिषडङ्गानि)	4	600-699
5		चितस्वशास्त्रविषयः 2.क.2: अर्थसङ्ग्रहः	4	600-699
6		चितस्वशास्त्रविषयः 2.क.3: वैदिकदेवतावादः वेदविज्ञानं च	4	600-699

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: सभाष्यसूक्ताध्ययनम् - 1

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैदिकसंहितासु निहितानां विविधसूक्तानां परिचयप्रदानम्।
2. सूक्तेषु निर्दिष्टानाम् ऋषीणां, छन्दसां, देवतानामथ च सूक्तविनियोगस्य स्वरूपप्रतिपादनम्।
3. सायणमहीधरकृतभाष्यपद्धत्योः तात्त्विकं वैयाकरणिकं च स्वरूपवर्णनम्।
4. सूक्तेष्वन्तर्भूतानां दार्शनिकचिकित्साविषयकमन्त्राणामवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. स्वाध्यायेन चतुर्वेदेष्वन्तर्भूतानां सूक्तानाम् अर्थवर्णने समर्थाः भविष्यन्ति।
2. सूक्तेषु निहितदर्शनसिद्धान्तान् सांस्कृतिकपरम्पराः च सरलतया निरूपयिष्यन्ति।
3. वैदिकसंस्कृतेः छन्दोबद्धवाङ्मयस्य शुद्धपठनम्, अन्वितार्थग्रहणं, पदविन्यासं, स्वरयुक्तोच्चारणशुद्धिं च अभ्यासेन करिष्यन्ति।
4. सायणमहीधरयोः भाष्यपद्धत्योः तुलनां कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	सभाष्यसूक्ताध्ययनम् - 1	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ऋग्वेदीयसूक्तानि। **श्रेयोऽङ्कः १**

- सरस्वतीसूक्तस्य (६.६१) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।
- रुद्रसूक्तस्य (१.११४) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।
- यक्ष्मनाशनसूक्तस्य (१०.१६३) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।

अन्वितिः २. यजुर्वेदीयसूक्तानि। **श्रेयोऽङ्कः १**

- उत्तरनारायणसूक्तस्य (अ. ३५ अनु. २) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, महीधरभाष्यं च।
- ओषधिसूक्तस्य (अ. १३ अनु. ६) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, महीधरभाष्यं च।

- सूर्यसूक्तस्य ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, महीधरभाष्यं च।

अन्वितिः ३. सामवेदीयसूक्तानि। **श्रेयोऽङ्कः १**

- ऐन्द्रपर्वणः प्रथमद्वितीययोः दशत्योः ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।

अन्वितिः ४. अथर्ववेदीय सूक्तानि **श्रेयोऽङ्कः १**

- अपां भेषजम् (का.१ सू.४-५) इति सूक्तस्य ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।
- नक्षत्रसूक्तस्य (का.१९) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पंडित, शंकर पाण्डुरङ्ग (सं.), (1895), *सायणभाष्यसहिता अथर्ववेदसंहिता*, मुम्बई : निर्णयसागरमुद्रणालयः।
2. निर्णयसागरमुद्रणालयः, (1929), *उव्वटाचार्यमहीधरयोः भाष्योपेता शुक्लयजुर्वेदवाजसनेयिसंहिता*, मुम्बई : निर्णयसागरमुद्रणालयः।
3. वैदिकसंशोधनमण्डलम्, (1936), *सायणभाष्यसमेता ऋग्वेदसंहिता*, पुणे : वैदिकसंशोधनमण्डलम्।
4. भट्टाचार्यः, सत्यव्रत सामश्रमि (सं.), (1983), *सायणभाष्यसहिता सामवेदसंहिता,* दिल्ली : मुनशीराम मनोहरलाल मुद्रणालयः।

सहायकाः ग्रन्थाः (Additional Readings)

1. महर्षि सान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, (2023), *वेदकल्पतरुः*, नई दिल्ली : राष्ट्रीय पुस्तक न्यास।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: दर्शपूर्णमास-मन्त्रभाष्यम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. दर्शपूर्णमासयागानां विवेचनम्।
2. यागोपयोगिविधीनां वर्णनम्।
3. यज्ञवस्तूनां निर्माणप्रक्रियायाः निरूपणम्।
4. उव्वटमहीधरयोः भाष्ययोः वैशिष्ट्यावबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. श्रौतयागविषये वर्णयितुं समर्थाः भविष्यन्ति।
2. यागक्रियाणां प्रतिपादनं कर्तुं सिद्धाः भविष्यन्ति।
3. यज्ञवस्तूनां निरूपणे समर्थाः भविष्यन्ति।
4. भाष्याध्ययनेन विषये नैपुण्यं सम्प्राप्य क्रियान्वयने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	दर्शपूर्णमास-मन्त्रभाष्यम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रथमाध्याये आरम्भतः षोडशकण्डिकाः। **श्रेयोऽङ्कः १**

- दर्शयागांगभूतः शाखाछेदनविधिः।
- श्रौतयागीयपात्रप्रतपनम्।
- अपां प्रणयनम्।
- पवित्रकरणविधिः।

अन्वितिः २. सप्तदशकण्डिकातः एकत्रिंशत्कण्डिकापर्यन्तम्। **श्रेयोऽङ्कः १**

- कपालोपधानविधिः।
- हविषः पेषणविधिः।
- पुरोडाशश्रपणविधिः।

- स्तम्बयजुर्हरणम्।

अन्वितिः ३. द्वितीयाध्याये आरम्भतः त्रयोदशकण्डिकाः। **श्रेयोऽङ्कः १**

- इध्मप्रोक्षणं परिधिनिधानञ्च।
- इडाप्राशनं, सूक्तवाग्विधिः च।
- संस्रवाहुतिः दक्षिणाग्निहोमप्रयोगश्च।
- समिष्टयजुर्होममन्त्राः।

अन्वितिः ४. द्वितीयाध्याये चतुर्दशकण्डिकातः चतुस्त्रिंशत्कण्डिकापर्यन्तम्। **श्रेयोऽङ्कः १**

- बर्हिर्होमप्रयोगः।
- व्रतविसर्जनम्।
- प्रणीताविमोकविधिः।
- पिण्डपितृयज्ञः।
- पितॄणां प्रार्थना च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. उव्वटाचार्यमहीधरौ (भाष्यकारौ), (2019), *भाष्योपेता शुक्लयजुर्वेद वाजसनेयीसंहिता,* वाराणसी : चौखम्बा प्रकाशन।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: शुक्लयजुःप्रातिशाख्यम् (वर्णोत्पत्त्यादिविचारः स्वरनियमाश्च)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वर्णोत्पत्तेः परिचयप्रदानम्।
2. संज्ञापरिभाषाणां, वर्णोच्चारणस्थानकरणानां च परिचयप्रदानम्।
3. पूर्वाङ्गपराङ्गचिन्तायाः परिचयप्रदानम्।
4. वैदिकस्वरनियमानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वर्णानामुत्पत्तिविषये वक्तुं सिद्धाः भविष्यन्ति।
2. उच्चारणस्थानकरणानां परिचयप्रदाने क्षमाः भविष्यन्ति।
3. स्वरविषयकविषयान् वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	शुक्लयजुःप्रातिशाख्यम् (वर्णोत्पत्त्यादिविचारः स्वरनियमाश्च)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रथमाध्याये 1 तः 40 सूत्राणि। **श्रेयोऽङ्कः १**

- वर्णोत्पत्तिः, अध्ययनविधिश्च।

अन्वितिः २. प्रथमाध्याये 41 तः 100 सूत्राणि। **श्रेयोऽङ्कः १**

- सञ्ज्ञा, परिभाषा, वर्णानाम् उच्चारण-स्थान-करणानि।

अन्वितिः ३. प्रथमाध्याये 101 तः 169 सूत्राणि। **श्रेयोऽङ्कः १**

- पूर्वाङ्गपराङ्गचिन्ता।

अन्वितिः ४. द्वितीयाध्यायः। **श्रेयोऽङ्कः १**

- स्वरनियमाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वर्मा, वीरेन्द्र कुमार (डा.), *वाजसनेयिप्रातिशाख्यम्*, नई दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: दर्शपूर्णमासप्रकरणं (कात्यायनश्रौतसूत्रे द्वितीयाध्यायः), कातीयेष्टिदीपकश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. दर्शपूर्णमासेष्टिस्वरूपविवेचनम्।
2. पञ्चभूसंस्कारविधिविवेचनम्।
3. वेदिनिर्माणप्रक्रियाविज्ञानम्।
4. ब्राह्मणवरणादिविधिविवेचनम्।
5. इष्टिसम्बन्धिपात्रादिसंस्कारविधिविवेचनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दर्शपूर्णमासेष्टिसम्बद्धक्रियाः ज्ञात्वा वर्णयितुं शक्ष्यन्ति।
2. इष्टिसम्बद्धविकृतियागानां परिचयप्रदाने समर्थाः भविष्यन्ति।
3. सर्वेषु यागेषु हवनादिषु च पञ्चभूसंस्कारविधौ प्रवृत्ताः भविष्यन्ति।
4. वेदिनिर्माणविधिविज्ञानेन शुल्बादिशास्त्रेषु प्रवेशं प्राप्स्यन्ति।
5. प्राचीनपरिमाणादिविषयैः परिचिताः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	दर्शपूर्णमासप्रकरणं (कात्यायनश्रौतसूत्रे द्वितीयाध्यायः), कातीयेष्टिदीपकश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. द्वितीयाध्याये १-४ कण्डिकाः। **श्रेयोऽङ्कः १**

- यजमानकर्तृककर्मनिरूपणम् (इष्टिपूर्वदिने.... इत्यारभ्य आसनात्तृणनिरसनपर्यन्तम्)
- ब्रह्मकर्तृककर्मनिरूपणम् (ब्रह्मासने उपवेशनमित्यारभ्य उपहितानां कपालानामङ्गारैस्तापनपर्यन्तम्)

अन्वितिः २. द्वितीयाध्याये ५-८ कण्डिकाः। **श्रेयोऽङ्कः १**

- पिष्टसंयवनार्थानामपां गार्हपत्येऽधिश्रयणमित्यारभ्य द्वितीयाध्यायान्तम्।

अन्वितिः ३. कातीयेष्टिदीपके आरम्भतः आज्यभागानुष्ठानपर्यन्तम्। **श्रेयोऽङ्कः १**

- दर्शपूर्णमासयोः सङ्कल्पः।
- पञ्चभूसंस्कारः।
- आहवनीयाद्यग्नीनामुद्धरणम्।
- अग्न्यन्वाधानविधिः।
- व्रतग्रहणाशनानशनादिकम्।
- यजमानस्य ब्रह्मादि-ऋत्विजां चासनानि।
- ब्रह्मवरणम्।
- चमसप्रणयनम्।
- अग्निपरिस्तरणम्।
- पात्रासादनम्।
- शूर्पादिपात्राणां प्रतपनं संस्कारश्च।
- हविर्निर्वापः ।
- पवित्रीनिर्माणं प्रणीताजलस्य संस्कारश्च।
- आग्नेयादिहविषां संस्कारः।
- आसादितपात्राणां प्रोक्षणम्।
- हविषः कुट्टनोपक्रमः।
- दृषदुपलयोराहननम्।
- हविष्कण्डनम्।
- कपालोपधानम्।
- तण्डुलानां पेषणक्रमः।
- वेदीनिर्माणविधिः।
- उपसर्जनीजलेन पिष्टस्य सम्मिश्रणम्।
- पुरोडाशश्रपणम्।
- पिष्टलेपस्य निनयनम्।
- वेदीनिर्माणक्रमः।
- स्तम्बयजुर्हरणम्।
- पूर्वपरिग्रहः।
- वेदेरुत्तरपरिग्रहः।
- वेदेः समीकरणम्।
- स्रुवादिपात्राणामासादनं मार्जनञ्च।
- पुनस्स्रुवादिपात्राणां प्रतपनं मार्जनञ्च।
- योक्त्रसन्नहनम्।
- आज्यावेक्षणम्।
- आज्यसंस्कारः।
- इध्मवेदिबर्हिषां प्रोक्षणोपक्रमः।
- आहवनीयाग्निं परितः परिधीनां स्थापनम्।
- व्रतग्रहणस्यान्तिमोऽवसरः।
- होतुः कर्म।
- सामिधेनीनाम् ऋचां पाठः ।
- पूर्वाघारः।
- आहवनीयाग्नेः सम्मार्जनम्।
- उत्तराघारः।
- आर्षेयप्रवरणम्।
- पञ्च प्रयाजाः।
- जुहूध्रुवयोरभिघारणम्।
- आज्यभागानुष्ठानम्।

अन्वितिः ४. कातीयेष्टिदीपके प्रधानयागतः ग्रन्थसमाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- प्रधानयागः।
- स्विष्टकृदाहुतिः।

- प्राशित्रस्य प्राशनम्।
- इडोपाह्वानम्।
- इडादिहविश्शेषस्य भक्षणम्।
- भक्षणान्ते मार्जनम्।
- अन्वाहार्यदक्षिणायाः सङ्कल्पः समर्पणञ्च।
- अनुयाजयागस्योपक्रमः।
- अनुयाजयागः।
- सूक्तवाक्पाठः।
- प्रस्तरप्रहरणम्।
- परिध्यनुप्रहरणम्।
- संस्रवहोमः।
- पत्नीसंयाजाः।
- पत्नीसंयाजकर्मान्ते पुनः संस्रवहोमः।
- पिष्टलेपहोमः।
- समष्टियजुस्संज्ञको होमः।
- बर्हिर्होमः।
- प्रणीताजलस्य निनयनम्।
- पूर्णपात्रजलेन मुखमार्जनम्।
- विष्णुपादबुद्ध्या पादप्रक्षेपः (विष्णुक्रमा:)
- आशिष: प्रार्थयेत्।
- व्रतसमाप्तिर्भागग्रहणम्।
- ब्राह्मणभोजनस्य सङ्कल्पः।
- कर्मसमाप्तौ समिद्धोमः।
- प्रार्थना-क्षमायाचना।
- सोमयाजिनो नियमेन सान्नायवती दर्शेष्टिः।
- पिण्डपितृयज्ञः।
- परिशिष्टः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मिश्रः, देवेन्द्रप्रसाद (डा.), (2021), *कात्यायनश्रौतसूत्रम्,* दिल्ली : चौखम्भा सुरभारती प्रकाशन।
2. मिश्र, श्रीदेव (डा.), (2021), *कातीयेष्टिदीपकः,* वाराणसी : चौखम्भासंस्कृतभवनम्।
3. पं० नित्यानन्दपन्तपर्वतीयः, म०म० (2007), *कातीयेष्टिदीपकः (दर्शपौर्णमासपद्धतिः),* वाराणसी : चौखम्भासंस्कृतसंस्थानम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. झा, लक्ष्मीश्वर (प्रो०), (2021), *कात्यायनश्रौतसूत्रम् (प्रथमो भागः),* दिल्ली : चौखम्भा ओरियण्टालिया।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester-2)

प्रधानः पाठ्यक्रमः (Major) 2.1: शतपथब्राह्मणभाष्ये प्रथमद्वितीयाध्यायौ

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. शतपथब्राह्मणे निरूपितवैदिकधर्मस्य यज्ञानुष्ठानस्य च गूढतत्त्वानां निरूपणम्।
2. यागादिषु उपयुज्यमानानां वेदीनां यज्ञपात्राणां च विवेचनम्।
3. यजमानस्य व्रताचारनियमानां स्वरूपोपस्थापनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैदिककर्मसु निपुणतामर्जिष्यन्ति।
2. वैदिककर्मविधानस्य प्रतिपादने समर्थाः भविष्यन्ति।
3. यज्ञानुष्ठाने निषिद्धकर्मणां निरूपणे सक्षमाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	शतपथब्राह्मणभाष्ये प्रथमद्वितीयाध्यायौ	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रथमाध्याये प्रथमद्वितीयब्राह्मणे। **श्रेयोऽङ्कः १**

- व्रतोपक्रम-यजमाननियमादिविवरणम्।
- शूर्पाद्यादानहविस्सम्पादननियमाः।

अन्वितिः २. प्रथमाध्याये तृतीयचतुर्थब्राह्मणे। **श्रेयोऽङ्कः १**

- पवित्रकरणात् यज्ञपात्रप्रोक्षणपर्यन्तम्।
- कृष्णाजिनादानम्।
- त्रिःफलीकरणम्।
- शम्यासमाहननादिपर्यन्तम्।

अन्वितिः ३. द्वितीयाध्याये प्रथमद्वितीयतृतीयब्राह्मणानि। **श्रेयोऽङ्कः १**

- कपालोपधानात् आज्यनिर्वापप्रकरणनिरूपणपर्यन्तम्।

- पिष्टसंवपनादिप्रकरणात् तुषविमोकप्रकरणनिरूपणं यावत्।
- आप्त्यसञ्ज्ञकदेवतानामुत्पत्तिकथनम्।
- विश्वरूपवधप्रतिपादनम्।
- अदक्षिणाकयागानुष्ठानस्य निषेधकथनम्।
- अन्वाहार्यदक्षिणादिपुरोडाशपाङ्क्तत्वनिरूपणम्।

अन्वितिः ४. द्वितीयाध्याये चतुर्थपञ्चमब्राह्मणे। **श्रेयोऽङ्कः १**

- वेदिकरणात् स्तम्बयजुर्हरणपर्यन्तम्।
- वेदिपरिग्रहात् वेदिस्पर्शनिषेधपर्यन्तम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शतपथब्राह्मणभाष्यम्, सायणहरिस्वामीभाष्य, दिल्ली : नाग प्रकाशक।

सहायकाः ग्रन्थाः (Additional Readings)

1. युगलकिशोरमिश्रः, प्रो., (टीकाकारः), शतपथब्राह्मणभाष्यम्, सायणभाष्यं हिन्दीटीकासहितम्।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: सभाष्यसूक्ताध्ययनम् – 2

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वेदचतुष्टयस्य सूक्तानां सभाष्यमध्ययनम्।
2. सूक्तनिर्दिष्टानाम् ऋषीणां, छन्दसां, देवतानां सूक्तविनियोगस्य च वर्णनम्।
3. सायणाद्याचार्याणां भाष्यपद्धतेः अवलोकनम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सूक्ताध्ययनेन अर्थबोधने समर्थाः भविष्यन्ति।
2. विविधभाष्यावलोकनेन तुलनां कर्तुं शक्ष्यन्ति।
3. भैषज्यसिद्धान्तानां दार्शनिकविषयाणां प्रतिपादने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	सभाष्यसूक्ताध्ययनम् - 2	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ऋग्वेदीयसूक्तानि। **श्रेयोऽङ्कः १**

- राजयक्ष्मघ्नसूक्तस्य (१०.१६१) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।
- श्रद्धासूक्तस्य (१०.१५१) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।
- नदीसूक्तस्य (१०.७५) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।

अन्वितिः २. यजुर्वेदीयसूक्तानि **श्रेयोऽङ्कः १**

- अग्निसूक्तस्य (अ.२९ अनु. १) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, महीधरभाष्यं च।
- शान्तिसूक्तस्य (अ. २७) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, महीधरभाष्यं च।

अन्वितिः ३. सामवेदीयसूक्तानि। **श्रेयोऽङ्कः १**

- पावमानपर्वणः प्रथमाद्वितीयदशत्योः ऋषिच्छन्दोदैवताः, सूक्तविनियोगश्च।
- माधवभरतस्वामिभाष्यं च।

अन्वितिः ४. अथर्ववेदीयसूक्तानि। **श्रेयोऽङ्कः १**

- कृषिसूक्तस्य (का. ३ सू. १६) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।
- मेधासूक्तस्य (का. ६ सू. १३९) ऋषिच्छन्दोदैवताः, सूक्तविनियोगः, सायणभाष्यं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वैदिक संशोधन मण्डल, (1936), *सायणभाष्यसमेता ऋग्वेदसंहिता*, पुणे : वैदिक संशोधन मण्डल।
2. निर्णयसागर मुद्रणालय, (1929), *उवटाचार्य-महीधरयोः भाष्योपेता शुक्लयजुर्वेद वाजसनेयीसंहिता*, मुम्बई : निर्णयसागर मुद्रणालय।
3. सत्यव्रत सामश्रमि भट्टाचार्य, (1983), *सायणभाष्यसहित सामवेदसंहिता*, दिल्ली : मुनशीराम मनोहरलाल मुद्रणालय।
4. शंकर पाण्डुरंग पंडित, (1895), *सायणभाष्यसहिता अथर्ववेदसंहिता*, मुम्बई : निर्णयसागर मुद्रणालय।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: अग्न्याधान-अग्निहोत्रमन्त्रभाष्यम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अग्निहोत्रस्य महत्त्वविवेचनम्।
2. वैदिकमन्त्राणां विश्लेषणात्मकमध्ययनम्।
3. चातुर्मास्ययागस्य परिचयः।
4. मन्त्राणाम् ऋषिच्छन्दोदैवतानां निरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. यज्ञानां माध्यमेन आत्मशुद्धेः लोककल्याणस्य च विषयान् वर्णयिष्यन्ति।
2. वेदवाङ्मये मन्त्रार्थविवेचनं, भाष्यगौरवं चाधीत्य अग्न्याधानादीनां परिचयं वक्तुं शक्ष्यन्ति।
3. शुक्लयजुर्वेदस्य वाजसनेयिसंहितायाः विषयान् निरूपयितुं शक्ष्यन्ति।
4. चातुर्मास्यादिप्रकरणान् ज्ञात्वा बोधने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	अग्न्याधान-अग्निहोत्रमन्त्रभाष्यम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. अग्न्याधानादिपरिचयः। **श्रेयोऽङ्कः १**

- अग्न्याधानपरिचयः।
- अग्निहोत्रपरिचयः।
- चातुर्मास्यपरिचयः।
- मन्त्राणाम् ऋषिच्छन्दोदैवतज्ञानम्।

अन्वितिः २. तृतीयाध्याये प्रथमकण्डिकातः एकोनविंशकण्डिकापर्यन्तम्। **श्रेयोऽङ्कः १**

- घृताक्तसमिदाधानात् आहवनीयस्योपविश्यजपपर्यन्तम्।

अन्वितिः ३. विंशकण्डिकातः त्रिचत्वारिंशकण्डिकापर्यन्तम्। **श्रेयोऽङ्कः १**

- गोऽभ्ययनात् उपस्थानमन्त्रसमाप्तिपर्यन्तम्।

अन्वितिः ४. चतुश्चत्वारिंशकण्डिकातः त्रिषष्ठिकण्डिकापर्यन्तम्। **श्रेयोऽङ्कः १**

- चातुर्मास्यप्रकरणात् मुण्डनार्थं क्षुरादानपर्यन्तम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. उव्वटाचार्य-महीधर, (2019), *भाष्योपेता शुक्लयजुर्वेद वाजसनेयीसंहिता*, वाराणसी : चौखम्बा प्रकाशन।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.4: उपनिषदाम् अध्ययनम् (शाङ्करभाष्यसहितम्)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. उपनिषदां परिचयप्रदानम्।
2. उपनिषत्सु अद्वैततत्त्वस्य परिचयप्रदानम्।
3. उपनिषत्सु संवादविषयकपरिचयप्रदानम्।
4. ज्ञानकर्ममार्गयोः परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भगवच्छङ्करपादानाम् अद्वैततत्त्वज्ञानस्य परिचयं वक्तुं शक्ष्यन्ति।
2. आत्मतत्त्वविषकविचारान् प्रतिपादयितुं समर्थाः भविष्यन्ति।
3. छान्दोग्योपनिषदः आरुणिश्वेतकेतुसंवादं वर्णयितुं शक्ष्यन्ति।
4. ज्ञानकर्ममार्गयोः विवेचनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	उपनिषदाम् अध्ययनम् (शाङ्करभाष्यसहितम्)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ईशावास्योपनिषच्छाङ्करभाष्यम् - आरम्भतः अष्टममन्त्रपर्यन्तम्। **श्रेयोऽङ्कः १**

- शान्तिपाठः, सम्बन्धभाष्यं, सर्वत्र भगवद्दृष्टेरुपदेशश्च।
- मनुष्यत्वाभिमानिनां कृते कर्मविधिः।
- अज्ञनिन्दा, आत्मनः स्वरूपञ्च।
- अभेददर्शिनः स्थितिः, आत्मनिरूपणञ्च।

अन्वितिः २. ईशावास्योपनिषच्छाङ्करभाष्यं - नवममन्त्रतः समाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- ज्ञानमार्गः कर्ममार्गश्च।
- कर्मणः उपासनायाश्च समुच्चयः।
- व्यक्ताव्यक्तोपासनासमुच्चयः।

- व्यक्ताव्यक्तोपासनाफलानि।
- उपासकस्य मार्गयाचना, उपासकस्य प्रार्थना च।
- ग्रन्थार्थविवेचनम्।
- शान्तिपाठः।

अन्वितिः ३. छान्दोग्योपनिषच्छाङ्करभाष्यम् (1-8 खण्डाः) **श्रेयोऽङ्कः १**

- श्वेतकेतुं प्रति आरुणेरुपदेशः।
- पूर्वपक्षखण्डनपूर्वकं जगतः सद्रूपतायाः समर्थनम्।
- सृष्टिक्रमः, समष्टिव्यष्टिज्ञानञ्च।
- अन्नादीनां त्रिविधाः परिणामाः।
- मन आदीन्द्रियाणाम् अन्नादीनां सूक्ष्मभागत्वसिद्धत्वम्।
- षोडशकलाविशिष्टपुरुषस्य उपदेशः ।
- सुषुप्तिकाले जीवस्थितेरुपदेशः।

अन्वितिः ४. छान्दोग्योपनिषच्छाङ्करभाष्यम् (9-16 खण्डाः) **श्रेयोऽङ्कः १**

- मधुकृतां दृष्टान्तद्वारा उपदेशः ।
- नद्याः दृष्टान्तद्वारा उपदेशः।
- वृक्षस्य दृष्टान्तद्वारा उपदेशः।
- न्यग्रोधफलस्य दृष्टान्तद्वारा उपदेशः।
- लवणस्य दृष्टान्तद्वारा उपदेशः।
- अन्यत्रानीतपुरुषस्य दृष्टान्तद्वारा उपदेशः।
- मुमूर्षुपुरुषस्य दृष्टान्तद्वारा उपदेशः।
- चौरेण तप्तपरशुग्रहणस्य दृष्टान्तद्वारा उपदेशः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. गीताप्रेस, (2014), *ईशादि नौ उपनिषद् (सानुवाद शाङ्करभाष्यसहित)*, गोरखपुर : गीताप्रेस।
2. गीताप्रेस, (2014), *छान्दोग्योपनिषद् (सानुवाद शाङ्करभाष्यसहित)*, गोरखपुर : गीताप्रेस।

सहायकाः ग्रन्थाः (Additional Readings)

1. गिरि, विष्णुदेवानन्द, (2014), *छान्दोग्योपनिषत् (सटिप्पणी शाङ्करभाष्यसमेता)*, ऋषिकेश : कैलासाश्रम ब्रह्मविद्यापीठम्।

चितस्वशास्त्रविषयाः

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

चितस्वशास्त्रविषयः (DSE) 1.क.1: वैदिकवाङ्मयविस्तरः - 1

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वेदचतुष्टयस्य सामान्यज्ञानम्।
2. संहिताग्रन्थानां परिचयप्रदानम्।
3. ब्राह्मणग्रन्थानां निरूपणम्।
4. आरण्यकानां प्रतिपादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वेदचतुष्टयस्य सामान्यपरिचयप्रदाने क्षमाः भविष्यन्ति।
2. संहिताग्रन्थानां परिचयकथने सिद्धाः भविष्यन्ति।
3. ब्राह्मणग्रन्थप्रतिपादितविषयान् वक्तुं शक्ष्यन्ति।
4. आरण्यकोपनिषद्ग्रन्थानां विषयवर्णने सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.1	वैदिकवाङ्मयविस्तरः - 1	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. संहिताः। **श्रेयोऽङ्कः १**

- ऋग्वेदः, ऋग्वेदस्य शाखाः प्रतिपादितविषयाश्च।
- शुक्लयजुर्वेदः, शुक्लयजुर्वेदस्य शाखाः प्रतिपादितविषयाश्च।
- कृष्णयजुर्वेदः, कृष्णयजुर्वेदस्य शाखाः प्रतिपादितविषयाश्च।
- सामवेदः, सामवेदस्य शाखाः प्रतिपादितविषयाश्च।
- अथर्ववेदः, अथर्ववेदस्य शाखाः प्रतिपादितविषयाश्च।

अन्वितिः २. ब्राह्मणानि। **श्रेयोऽङ्कः १**

- ऋग्वेदीयब्राह्मणेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- शुक्लयजुर्वेदीयब्राह्मणेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।

- कृष्णयजुर्वेदीयब्राह्मणेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- सामवेददीयब्राह्मणेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- अथर्ववेदीयब्राह्मणेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।

अन्वितिः ३. आरण्यकानि। **श्रेयोऽङ्कः १**

- ऋग्वेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- शुक्लयजुर्वेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- कृष्णयजुर्वेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- सामवेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- अथर्ववेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।

अन्वितिः ४. उपनिषदः। **श्रेयोऽङ्कः १**

- ऋग्वेदीय-उपनिषत्सु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- शुक्लयजुर्वेदीय-उपनिषत्सु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- कृष्णयजुर्वेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- सामवेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।
- अथर्ववेदीय-आरण्यकेषु प्रतिपादितविषयाणां विशिष्टाध्ययनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मिश्रः, जगदीशचन्द्र (डा.), (2018), *वैदिकवाङ्मयस्येतिहासः*, वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. महर्षि सान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, (2023), *वेदकल्पतरुः*, नई दिल्ली : राष्ट्रीय पुस्तक न्यास।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.2: मनुस्मृतिः (द्वितीयाध्यायः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मानवस्य आद्यानां संस्काराणां परिचयसम्पादनम्।
2. गुरुवन्दनविधेः अध्ययनसम्बन्धिनियमानाञ्च निरूपणम्।
3. नित्यनैमित्तिकप्रायश्चित्तोपासनानां महत्त्ववर्णनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अध्ययननियमान् निरूपयितुं सिद्धाः भविष्यन्ति।
2. गुर्वाज्ञाकारित्वनियमतः अध्यायसमाप्तिपर्यन्तविषयान् निरूपयितुं शक्ष्यन्ति।
3. शिष्यगुणान् आचार्यगुणांश्च विस्तरेण वर्णयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.2	मनुस्मृतिः (द्वितीयाध्यायः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. अध्यायस्यादितः समावर्तनान्तम् ("होमादि कर्तव्यम्" इति श्लोकपर्यन्तम्) श्रेयोऽङ्कः १

- गुरुवन्दनविधिः।
- अध्ययननियमाः।
- प्राणायामः।
- प्रणवोत्पत्तिः।
- सावित्र्युत्पत्तिः।
- सावित्रीजपफलम्।
- सावित्रीजपाकरणे प्रायश्चित्तम्।
- प्रणवव्याहृतिसावित्रीप्रशंसा।
- प्रणवप्रशंसा।
- मानसजपस्याधिकारम्।
- इन्द्रियसंयमः।
- एकादशेन्द्रियाणि।
- इन्द्रियसंयमेन सिद्धिः न तु भोगैः।
- विषयोपेक्षकः श्रेष्ठः।
- इन्द्रियसंयमोपायाः।
- कामासक्तस्य यागादयो न फलदाः।
- जितेन्द्रियस्वरूपम्।
- एकेन्द्रियासंयमोऽपि निवार्यः।
- इन्द्रियसंयमस्य पुरुषार्थहेतुत्वम्।
- सन्ध्यात्रयवन्दनम्।
- वेदपाठाशक्तौ सावित्रीमात्रजपः।
- नित्यकर्मादौ नानध्यायः।
- जपयज्ञफलम्।
- समावर्तनान्तं होमादिकर्तव्यम्।

अन्वितिः २. शिष्यगुणवर्णनतः आचार्यगुणवर्णनपर्यन्तम्। **श्रेयोऽङ्कः १**

- शिष्यगुणाः।
- अपृष्टो वेदं न ब्रूयात्।
- निषेधातिक्रमे दोषः।
- असच्छिष्याय विद्या न वक्तव्या।
- सच्छिष्याय वक्तव्या।
- अध्ययनं विना वेदग्रहणनिषेधः।
- अध्यापकानां मान्यत्वम्।
- अविदिताचरणनिन्दा।
- आदौ गुरोः अभिवादनम्।
- वृद्धाभिवादनम्।
- अभिवादनफलम्।
- अभिवादनविधिः।
- प्रत्यभिवादनम्।
- प्रत्यभिवादनाज्ञाने दोषः।
- कुशलप्रश्नः।
- दीक्षितादेः नामग्रहणनिषेधः।
- परस्त्र्यादेः नामग्रहणनिषेधः।
- कनिष्ठमातुलवन्दननिषेधः।
- मातृष्वस्रादयो गुरुस्त्रीवत्पूज्याः।
- भ्रातृभार्याद्यभिवादनम्।
- ज्येष्ठभगिन्याद्यभिवादनम्।
- दशवर्षोऽपि ब्राह्मणः क्षत्रियादिभिः वन्द्यः।
- वित्तादीनि मान्यत्वकारणानि।
- रथारूढादेः पन्था देयः।
- स्नातकस्य पन्था राज्ञा देयः।

अन्वितिः ३. आचार्यगुणवर्णनतः अध्ययने गुरुहिते च यत्नकरणपर्यन्तम्। **श्रेयोऽङ्कः १**

- आचार्य-उपाध्याय-गुरु-ऋत्विक्-अध्यापकप्रशंसा।
- मात्रादीनामुत्कर्षः।
- आचार्यस्य श्रेष्ठत्वम्।
- बालोऽप्याचार्यः पितेव।
- वर्णक्रमेण ज्ञानादिना ज्यैष्ठ्यम्।
- मूर्खनिन्दा।
- शिष्याय मधुरा वाणी प्रयोक्तव्या।
- नरस्य वाङ्मनस्संयमः।
- परद्रोहादिनिषेधः।
- परेणावमाने कृतेऽपि क्षमा कार्या।
- अवमन्तुर्दोषः अनेन विधिना वेदोऽध्येतव्यः।
- वेदाभ्यासस्य श्रेष्ठत्वम्।
- वेदाभ्यासस्तुतिः।
- वेदमनधीत्य वेदाङ्गान्यविद्याध्ययननिषेधः।
- द्विजत्वनिरूपणम्।
- अनुपनीतस्यानधिकारः।
- कृतोपनयनस्य वेदाध्ययनम्।
- गोदानादौ नव्यदण्डादयः।
- नियमा एते अनुष्ठेयाः।
- नित्यस्नानतर्पणहोमादिब्रह्मचारिणो नियमाः।
- आचार्यार्थं जलकुशाद्याहरणम्।
- वेदयज्ञोपेतगृहाद्भिक्षा कर्त्तव्या।
- गुरुकुलादिभिक्षा।
- अभिशस्तभिक्षानिषेधः।
- सायंप्रातर्होमसमिधः।

- होमाद्यकरणे दोषः।
- एकगृहभिक्षानिषेधः।
- अध्ययने गुरुहिते च यत्नं कुर्यात्।

अन्वितिः ४. गुर्वाज्ञाकारित्वनियमतः अध्यायसमाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- गुर्वाज्ञाकारित्वम्।
- गुरुसमीपे चाञ्चल्यनिषेधः।
- गुरोः नामग्रहणादिकं न कार्यम्।
- गुरुनिन्दाश्रवणनिषेधः।
- गुरुपरिवादकरणफलम्।
- समीपं गत्वा गुरुं पूजयेत्।
- गुर्वादिपरोक्षे न किञ्चित्कथयेत्।
- यानादौ गुरुणा सहोपवेशनविचारः।
- परमगुरौ गुरुवद् वृत्तिः।
- विद्यागुरुविचारः।
- गुरुपुत्रविचारः।
- गुरुस्त्रीविचारः।
- स्त्रीस्वभावकथनम्।
- मात्रादिभिरेकान्तवासनिषेधः।
- युवतिगुरुस्त्रीवन्दनविचारः।
- गुरुशुश्रूषाफलम्।
- ब्रह्मचारिणः प्रकारत्रयम्।
- सूर्योदयास्तकालस्वापविचारः।
- सन्ध्योपासनमवश्यं कार्यम्।
- स्त्र्यादेः श्रेयकरणविचारः।
- त्रिवर्गः।
- पित्राचार्यादयो नावमान्याः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मनुस्मृतिः – मेधातिथिव्याख्यासहिता।

सहायकाः ग्रन्थाः (Additional Readings)

1. आचार्य नारायण राम (सं.), *मनुस्मृतिः (मन्वर्थमुक्तावलीसहिता)* (दशमावृत्तिः), मुम्बई : निर्णयसागरमुद्रणालयः।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.3: याज्ञवल्क्यस्मृतिः (आचाराध्यायः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. याज्ञवल्क्यस्मृतौ आचाराध्यायस्य निरूपणम्।
2. धर्मशास्त्रस्य स्वरूपं, चतुर्वर्णाश्रमव्यवस्थायाः महत्त्वञ्च।
3. विवाहप्रकाराणां, विधीनां, योग्यतानाञ्च निरूपणम्।
4. गृहस्थाश्रमिणां नित्यकर्मणां यज्ञादीनाञ्च वर्णनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ब्रह्मचर्यगृहस्थाश्रमयोः धर्मकार्याणि ज्ञात्वा कथने समर्थाः भविष्यन्ति।
2. नैतिकतायाः, संयमस्य, कर्तव्यनिष्ठायाश्च प्रतिपादने क्षमाः भविष्यन्ति।
3. भारतीयसंस्कृतेः परम्पराः, आचारविचारांश्च निरूपयितुं सिद्धाः भविष्यन्ति।
4. भक्ष्याभक्ष्यादिविषयान् ज्ञात्वा वक्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.3	याज्ञवल्क्यस्मृतिः (आचाराध्यायः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. उपोद्घातप्रकरणं ब्रह्मचारिप्रकरणं च। **श्रेयोऽङ्कः १**

- धर्मस्य कारकाः ज्ञापकाः च।
- संस्काराः।
- संस्कारफलानि।
- स्त्रियः संस्काराः।
- उपनयनसमयः।
- गुरोः धर्माः।
- शौचनियमाः।
- प्राजापत्यादितीर्थाः।
- आचमनविधिः।
- प्राणायामः।
- सावित्रीजपविधिः।
- अग्निकार्यम्।
- अभिवादनविधिः।
- अध्यापनयोग्याः।
- दण्डादीनां धारणम्।
- भिक्षाचरणविधिः।
- भोजननियमाः।
- ब्रह्मचारिणः निषिद्धधर्माः।
- आचार्यलक्षणम्।
- ब्रह्मचर्यस्यावधिः।
- उपनयनस्य समयसीमा।

- द्विजत्वस्य कारणम्।
- वेदाध्ययनफलम्।
- काम्यब्रह्मयज्ञाध्ययनस्य फलम्।
- पञ्चमहायज्ञस्य फलम्।
- नैष्ठिकब्रह्मचारिणः धर्माः।

अन्वितिः २. विवाहप्रकरणम्। **श्रेयोऽङ्कः १**

- गुरुदक्षिणायाः पूर्वस्नानम्।
- कन्यायाः लक्षणानि।
- सपिण्डविचारः।
- कन्यावरणनियमः।
- कन्यादाने वरनियमाः।
- अनुलोमविवाहः।
- विवाहस्य अष्टप्रकाराः।
- सवर्णविवाहे विशेषः।
- कन्याहरणदण्डः।
- कन्यादोषगोपनम्।
- नियोगविधिः।
- व्यभिचारिण्यै दण्डः।
- स्त्रियः पवित्रता।
- पुनर्विवाहहेतुः।
- पतिव्रतायाः प्रशंसा।
- स्त्रीधर्माः।
- ऋतुकालविचारः।
- स्त्रीणामादरः।
- स्त्रीणां कर्तव्यानि।

अन्वितिः ३. वर्णजातिविवेकप्रकरणं, गृहस्थधर्मप्रकरणं, स्नातकप्रकरणं च। **श्रेयोऽङ्कः १**

- सजातिपुत्रः।
- अनुलोमप्रतिलोमविवाहेन उत्पन्नः पुत्रः।
- जात्युत्कर्षनियमः।
- स्मार्ताग्निः श्रौताग्निश्च।
- गृहस्थधर्माः।
- राजाश्रयः।
- वेदादीनां जपाः।
- पञ्चमहायज्ञाः।
- भोजननियमाः।
- वेदपाठिनः सत्कारः।
- मधुपर्कपात्रम्।
- सायङ्कालीनकर्तव्याः।
- धर्मार्थकामानां सन्तुलनम्।
- द्विजातीनां कर्तव्याः।
- साधारणधर्माः।
- जीवनवृत्तेः चयनम्।
- श्रौतकर्म।
- आर्थिकविचारः।
- स्नातकव्रताः।
- शारीरिकपवित्रता।
- स्नातकधर्माः।
- दानस्वीकारे दोषः।
- उपाकर्मसमयः।
- उत्सर्जनसमयः।
- अनध्यायावसरः।
- औपचारिककर्तव्याः।
- धर्माचरणस्याधाराः।
- विवादपरित्यागफलम्।
- स्नाननियमाः।
- अन्येषां वस्तूनाम् उपयोगाय निषेधः।
- अभोज्यान्नम्।

अन्वितिः ४. भक्ष्याभक्ष्यप्रकरणं, द्रव्यशुद्धिप्रकरणं, दानप्रकरणं च। **श्रेयोऽङ्कः १**

- निषिद्धान्नम्।
- अपेयक्षीरम्।

- मांसभक्षणनिषेधः।
- पलाण्ड्वादीनां भक्षणनिषेधः।
- स्वर्णपात्रशुद्धिः।
- यज्ञपात्रशुद्धिः।
- वस्त्रशुद्धिः।
- भूमिशुद्धिः।
- अन्नशुद्धिः।
- जलशुद्धिः।
- मुखशुद्धिः।
- ब्राह्मणानां महत्वम्।
- दानवस्तूनि।
- दानपात्रम्।
- गोदानं तस्य फलं च।
- दानास्वीकारप्रशंसा।
- दातृचरित्रविचारः।
- वृत्तिनिर्वाहार्थं नियमापवादाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. चौखम्बा संस्कृत संस्थान, (1994), *याज्ञवल्क्यस्मृतिः (मिताक्षराव्याख्यासंवलिता)*, वाराणसी : चौखम्बा संस्कृत संस्थान।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

चितस्वशास्त्रविषयः (DSE) 2.क.1: वैदिकवाङ्मयविस्तरः - 2 (शिक्षादिषडङ्गानि)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैदिकवाङ्मये षडङ्गानां परिचयदानम्।
2. शिक्षाकल्पयोः विश्लेषणम् ।
3. व्याकरणशास्त्रस्य सामान्यपरिचयः।
4. छन्दःशास्त्रस्य वर्णनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. शिक्षावेदाङ्गस्याध्ययनेन स्वरोच्चारणप्रक्रियां वक्तुं शक्ष्यन्ति।
2. निरुक्तवेदाङ्गस्य विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
3. छन्दःशास्त्रस्याध्ययनेन वैदिकानां लौकिकानां च छन्दसां वर्णनं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.1	वैदिकवाङ्मयविस्तरः - 2 (शिक्षादिषडङ्गानि)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शिक्षावेदाङ्गं, कल्पवेदाङ्गञ्च। **श्रेयोऽङ्कः १**

- शिक्षावेदाङ्गविश्लेषणम्।
- कल्पवेदाङ्गविश्लेषणम्।

अन्वितिः २. व्याकरणवेदाङ्गम्। **श्रेयोऽङ्कः १**

- व्याकरणवेदाङ्गविश्लेषणम्।

अन्वितिः ३. छन्दोवेदाङ्गं, ज्यौतिषवेदाङ्गञ्च। **श्रेयोऽङ्कः १**

- छन्दोवेदाङ्गविश्लेषणम्।
- ज्यौतिषवेदाङ्गविश्लेषणम्।

अन्वितिः ४. निरुक्तवेदाङ्गम्। **श्रेयोऽङ्कः १**

- निरुक्तवेदाङ्गविश्लेषणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मिश्र, जगदीशचन्द्र, (2018), *वैदिकवाङ्मयस्य इतिहासः*, वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. महर्षिसान्दीपनिराष्ट्रीयवेदविद्याप्रतिष्ठानम्, (2023), *वेदकल्पतरुः*, नई दिल्ली : राष्ट्रीय पुस्तक न्यास।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 2.क.2: अर्थसङ्ग्रहः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मीमांसादर्शनस्य प्रमेयाणां परिचयप्रदानम्।
2. वेदभागस्य विधेः प्रकाराणां वर्णनम्।
3. भावनायाः स्वरूपं तद्भेदनिरूपणञ्च।
4. क्रमबोधकानां सहकारिप्रमाणानां प्रतिपादनम्।
5. वेदस्य विध्यादिपञ्चभागानां निरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विधेः पञ्चभेदानां परिचयकथने समर्थाः भविष्यन्ति।
2. विधिमीमांसया अङ्गादिभावविचारदृष्टिं वर्णयितुं सिद्धाः भविष्यन्ति।
3. यागादिषु विभिन्नकर्मणां पौर्वापर्यं वक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.2	अर्थसङ्ग्रहः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मङ्गलाचरणतः उत्पत्तिविधिपर्यन्तम्। **श्रेयोऽङ्कः १**

- उपोद्घातः।
- धर्मलक्षणम्।
- भावनासामान्यलक्षणम्।
- भावनाभेदौ –
  - शाब्दीभावना
  - आर्थीभावना
- वेदलक्षणम्।
- विधिमीमांसा -
  - गुणविधिः

- विशिष्टविधिः
- उत्पत्तिविधिः

अन्वितिः २. विनियोगविधिः। **श्रेयोऽङ्कः १**

- विनियोगविधिः।
- अङ्गत्वबोधकषट्सहकारिप्रमाणानि।
- श्रुतिः, लिङ्गं, वाक्यं च।
- प्रकृतिविकृतिलक्षणम्।
- प्रकरणम्
    - महाप्रकरणम्।
    - अवान्तरप्रकरणम्।
- सन्दंशलक्षणम्।
- स्थानम्।
- पाठसादेश्यम्।
- यथासङ्ख्यपाठः।
- सन्निधिपाठः।
- अनुष्ठानसादेश्यम्।
- समाख्या।
- सन्निपत्योपकारकम्।
- आरादुपकारकम्।

अन्वितिः ३. प्रयोगविधितः परिसङ्ख्याविधिपर्यन्तम्। **श्रेयोऽङ्कः १**

- प्रयोगविधिः।
- क्रमबोधकषट्सहकारिप्रमाणानि -
    - श्रुतिक्रमः
    - अर्थक्रमः
    - पाठक्रमः
        - मन्त्रपाठः
        - ब्राह्मणपाठः
    - स्थानक्रमः
    - मुख्यक्रमः

  - प्रवृत्तिक्रमः
- अधिकारविधिः।
- मन्त्रमीमांसा।
- नियमविधिः।
- परिसङ्ख्याविधिः।

अन्वितिः ४. नामधेयप्रकरणतः ग्रन्थसमाप्तिपर्यन्तम्। **श्रेयोऽङ्कः १**

- नामधेयत्वे निमित्तचतुष्टयम्।
- मत्वर्थलक्षणाभयम्।
- वाक्यभेदभयम्।
- तत्प्रख्यशास्त्रम्।
- तद्व्यपदेशः।
- निषेधमीमांसा।
- पर्युदासः।
- उपसंहारः।
- अर्थवादपरिच्छेदः -
  - विधिशेषः
  - निषेधशेषः
  - गुणवादः
  - अनुवादः
  - भूतार्थवादः
- निगमनपरिच्छेदः -
  - काम्यकर्मणः स्वर्गाद्यनित्यफलहेतुत्वम्।
  - ईश्वरार्पणबुद्ध्यानुष्ठितः यागः निःश्रेयसत्वहेतुरिति प्रतिपादनम्।
  - स्मृतिप्रामाण्यम्।
- अर्थसङ्ग्रहप्रयोजनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *अर्थालोकटीकासहितः अर्थसंग्रहः*, वाराणसी : चौखम्बा ओरियंटालिया।
2. मुसलगांवकर, राजेश्वरशास्त्री, *अर्थसंग्रहः*, वाराणसी : चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. काशीनाथशास्त्री, पं., (सम्पा.) (1942), अर्थसङ्ग्रहकौमुदीसहितः अर्थसङ्ग्रहः, मुम्बई : निर्णयसागरमुद्रणालयः।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 2.क.3: वैदिकदेवतावादः वेदविज्ञानं च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वैदिकवाङ्मये देवतानां ज्ञानम्।
2. वैदिकदेवतावादस्य दार्शनिकस्वरूपविवेचनम्।
3. वेदेषु विज्ञानस्य स्वरूपावबोधनम्।
4. वैदिकविज्ञानस्य आधुनिकसन्दर्भे उपयोगितापरिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैदिकग्रन्थेषु उल्लिखितानां देवतानां स्वरूपं, तेषां कार्यविभागं च वर्णयिष्यन्ति।
2. निरुक्तशास्त्रसाहाय्येन दैवतकाण्डस्य अध्ययनं कृत्वा तस्य व्युत्पत्तिशास्त्रीयं ज्ञानमपि निरूपयिष्यन्ति।
3. वैदिकवाङ्मये उल्लिखितं पर्यावरणचिन्तनं, वनस्पतिविज्ञानं, कृषिविज्ञानं, नक्षत्रविज्ञानं च वैज्ञानिकदृष्ट्या वर्णयितुं समर्थाः भविष्यन्ति।
4. वैदिकविज्ञानस्य आधुनिकजगति उपयोगं, तस्य ऐतिहासिकं महत्त्वं च वक्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.3	वैदिकदेवतावादः वेदविज्ञानं च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वैदिकवाङ्मये देवताविचारः **श्रेयोऽङ्कः १**

- देवतावादस्य अवधारणाः।
- वेदेषु देवतानां स्वरूपम्।
- निरुक्तशास्त्रे दैवतकाण्डस्य सामान्याध्ययनम्।
- वैदिकदेवतानां पुराणसन्दर्भाः।

अन्वितिः २. वैदिकदेवतावादः। **श्रेयोऽङ्कः १**

- वैदिकदेवशास्त्रस्य स्वरूपम्।
- वैदिकदेवतानां विभाजनम्।

- पृथिवी-अन्तरिक्ष-द्युस्थानीयदेवतानां स्वरूपं वैशिष्ट्यं च।

अन्वितिः ३. वेदेषु ज्ञानविज्ञानस्वरूपम्। **श्रेयोऽङ्कः १**

- वेदेषु ज्ञानविज्ञानस्य अवधारणाः।
- वेदेषु शरीरविज्ञानं, पदार्थविज्ञानं च।
- वेदेषु प्रौद्योगिकी, चिकित्साविज्ञानं, भौतिकविज्ञानं, रसायनविज्ञानं च।

अन्वितिः ४. वेदनिहितं विविधविज्ञानम्। **श्रेयोऽङ्कः १**

- वैदिकपर्यावरणं, वैदिकवनस्पतिविज्ञानं च।
- वैदिकस्थापत्यविज्ञानं, वैदिकधातुविज्ञानं च।
- वैदिकवास्तुविद्या, वैदिककृषिविज्ञानं च।
- वैदिकनक्षत्रविज्ञानं, वैदिकभूगर्भविज्ञानादिकं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. त्रिपाठी, ग. (1983), *वैदिक देवता: उद्भव एवं विकास*, वाराणसी : भारतीय विद्या प्रकाशन।
2. द्विवेदी, क. (2004), *वेदों में विज्ञान*, ज्ञानपुर (उ.प्र.) : विश्वभारती अनुसन्धान परिषद्।
3. छज्जूरामशास्त्री, पं. (2020). *निरुक्तपञ्चाध्यायी*, नईदिल्ली : मेहरचन्द लछमनदास पब्लिकेशन्स्।

One Year PG in

Siddhanta Jyotisha

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातकोत्तरकार्यक्रमः - सिद्धान्तज्यौतिषम्

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली – 110002

Curriculum Development Committee for One year PG (Siddhanta Jyotisha)

Prof. Deviprasad Tripathi

Chairman of the Sub-Committee and Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi ✉ devi@slbsrsv.ac.in

Prof. Vinay Kumar Pandey

Professor, Ex. Head, Department of Jyotish, Banaras Hindu University, Varanasi-5

✉ drvkpbhu@gmail.com

Dr. Upendra Bhargava

Asst. Professor, Maharshi Panini Sanskrit Evam Vedic University, Ujjain

✉ astroindia2020@gmail.com

Dr. Vijayananda Adiga B

Asst. Professor, Department of Jyotish, Central Sanskrit University, Rajiv Gandhi Campus Sringeri – Karnataka 577139 ✉ adiga.vijaya@gmail.com

Dr. Dinakar Marathe

Convenor of the Sub-Committee and Assoc. Professor, Department of Jyotish, Kavikulguru Kalidas Sanskrit University, Ratnagiri Campus, Ratnagiri, Maharashtra - 415612

✉ dinakarmarathe@gmail.com

विषयसूची

कार्यक्रमस्य परिचयः (Introduction of the Program) 1

कार्यक्रमस्य उद्देश्यानि (Program Objectives) 2

कार्यक्रमस्य परिणामाः (Program Outcomes) 3

कार्यक्रमस्य वैशिष्ट्यम् (Graduate Attributes of the Program) 3

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् 4

चितस्वशास्त्रविषयकपाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् 5

प्रधानपाठ्यक्रमाणां सञ्चयः 6

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः 6

प्रधानपाठ्यक्रमाः 7

प्रथमसत्रार्द्धः (Semester - 1) 8

प्रधानः पाठ्यक्रमः (Major) 1.1: भगणोपपत्तिः ग्रहस्पष्टीकरणोपपत्तिश्च 8

प्रधानः पाठ्यक्रमः (Major) 1.2: दिग्देशकालसाधनोपपत्तिः 11

प्रधानः पाठ्यक्रमः (Major) 1.3: ग्रहणोपपत्तिः 14

प्रधानः पाठ्यक्रमः (Major) 1.4: युत्युदयास्तशृङ्गोन्नतिपातोपपत्तिः 16

द्वितीयसत्रार्द्धः (Semester - 2) 18

प्रधानः पाठ्यक्रमः (Major) 2.1: ब्राह्मस्फुटसिद्धान्ताधारेण तन्त्रपरीक्षोपपत्तिः 18

प्रधानः पाठ्यक्रमः (Major) 2.2: सिद्धान्ततत्त्वविवेकाधारेण बिम्बोपपत्तिः छायोपपत्तिश्च 21

प्रधानः पाठ्यक्रमः (Major) 2.3: करणगणितोपपत्तिः 24

प्रधानः पाठ्यक्रमः (Major) 2.4: ग्रहगणितपरिष्कारविधिः 26

चितस्वशास्त्रविषयक-पाठ्यक्रमाः 28

प्रथमसत्रार्द्धः (Semester - 1) 29

चितस्वशास्त्रविषयः (DSE) 1.क.1: ज्योतिर्मीमांसा ग्रहणमण्डनं गोलसारश्च 29

चितस्वशास्त्रविषयः (DSE) 1.क.2: सिद्धान्तसम्राट् (प्रथमः भागः) 32

चितस्वशास्त्रविषयः (DSE) 1.क.3: भद्रगणितम् 35

चितस्वशास्त्रविषयः (DSE) 1.क.4: ज्योतिर्गणितम् (प्रथमः परिच्छेदः) 37

द्वितीयसत्रार्द्धः (Semester - 2) 40

चितस्वशास्त्रविषयः (DSE) 2.क.1: ब्राह्मस्फुटसिद्धान्ते क्षेत्रव्यवहारः कुट्टकञ्च 40

चितस्वशास्त्रविषयः (DSE) 2.क.2: सिद्धान्तसम्राट् (द्वितीयः भागः) 43
चितस्वशास्त्रविषयः (DSE) 2.क.3: रेखागणितम्..... 46
चितस्वशास्त्रविषयः (DSE) 2.क.4: ज्योतिर्गणितम् (द्वितीयः परिच्छेदः)..... 49

कार्यक्रमस्य परिचयः

(Introduction of the Program)

आचार्यः सिद्धान्तज्यौतिषम् (M.A. in Siddhanta Jyotisha) इत्याख्यः पाठ्यक्रमः एकवर्षात्मकः कार्यक्रमः वर्तते। कार्यक्रमेऽस्मिन् आहत्य द्वे सत्रे भवतः। छात्राः सिद्धान्तज्यौतिषस्य शास्त्रिस्तरे शुद्धगणितस्य अनुप्रयुक्तगणितस्य च अध्ययनं कृत्वा सम्प्रति आचार्यस्तरे तेषां गणितानाम् उपपत्तिम् अध्येतुं प्रवर्तन्ते। अतः सम्पूर्णस्य सिद्धान्तज्यौतिषपाठ्यक्रमस्य अध्ययनेन छात्राः ग्रहगणितस्य तत्कारणस्य चेति द्वयोरपि ज्ञानं प्राप्नुवन्तीति कार्यक्रमस्य वैशिष्ट्यं वर्तते।

अर्हता - शास्त्रीकक्ष्यायां तत्समकक्ष्यापरीक्षायां N.T.A. द्वारा सञ्चाल्यमानार्हतापरीक्षायां वा उत्तीर्णाः छात्राः कार्यक्रमेऽस्मिन् प्रवेष्टुमर्हन्ति। अत्र सत्रद्वये आहत्य -

- प्रधानपाठ्यक्रमाः (Major Course) 8 पाठ्यक्रमाः (Courses/Papers)
- चितस्वशास्त्रविषयकपाठ्यक्रमाः (DSE) 8 पाठ्यक्रमाः (Courses/Papers)

कार्यक्रमस्य उद्देश्यानि

(Program Objectives)

- भारतीयपरम्पराधारेण ग्रहगणितस्य उपपत्तीनामध्ययनम्। तद्द्वारा भारतीयज्योतिषशास्त्रस्य सिद्धान्तपारम्पर्ये गूढार्थज्ञानस्य विकसनम्।
- ग्रहगणिते, कालदिग्देशनिर्णये, ग्रहणयुत्यादिषु च शास्त्रीययुक्तीनां प्रपञ्चनम्।
- ग्रहगणितस्य तत्परीक्षणक्रमस्य च अध्ययनेन भारतीयार्षपरम्पयाः संरक्षणम् , आधुनिकगणितदृष्ट्या प्राच्यज्योतिषशास्त्रस्य सामञ्जस्यसाधनं च।
- प्राचीनाचार्यकृतसिद्धान्तग्रन्थेषु निहितानां गोलीयोपपत्तीनां गणितीयोपपत्तीनां च तात्त्विकं समीक्षणम्।
- प्रयोगात्मकशिक्षायाः माध्यमेन स्वयं पञ्चाङ्गनिर्माणे, गणितपरीक्षायां, ग्रहवेधे च दक्षतासम्पादनम्।
- नूतनपद्धत्याः समवायेन शास्त्रपरम्परायाः संरक्षणं प्रसारणं च।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

अस्य कार्यक्रमस्य अध्ययनादनन्तरं छात्राः -

- ब्राह्मस्फुटसिद्धान्त-सिद्धान्तशिरोमणि-सिद्धान्ततत्त्वविवेकादिसिद्धान्तग्रन्थेषु निहितानां गणितोपपत्तीनां तत्त्वं सम्यक् ज्ञातुं समर्थाः भविष्यन्ति।
- नक्षत्रग्रहयुत्यादीनां कारणं यथार्थतया विवेचयितुं कुशलाः भूत्वा तद्विषये समाजे अन्यान् अवबोधयितुं सामर्थ्यं प्राप्स्यन्ति। स्वयं पञ्चाङ्गं, ग्रहणगणितं, युत्युदयास्तगणितं च साधयितुं प्रवीणाः भविष्यन्ति।
- ग्रहगणिते पाश्चात्त्यपद्धतिभिः सह तुलनात्मकं चिन्तनं कर्तुं सक्षमाः भविष्यन्ति।
- गणितपद्धत्याः शुद्धिपरीक्षणं कर्तुं, नूतनगणितविधानं च प्रस्तोतुं सामर्थ्यं प्राप्स्यन्ति।
- शास्त्रार्थसंवादे, शोधनलेखने, व्याख्याने च तर्कयुक्ततया प्रस्तुतीकरणाय दक्षाः भविष्यन्ति।

भगणोपपत्तिः, ग्रहानयनोपपत्तिः, देशान्तरभुजान्तरोदयान्तरोपपत्तिः, लग्नानयनोपपत्तिः, दिक्साधनोपपत्तिः, अक्षक्षेत्रीयानुपातोपपत्तिः, छायानयनोपपत्तिः, छायातो ग्रहानयनोपपत्तिः, देवासुरपितृब्राह्मदिनोपपत्तिः, युत्याद्युपपत्तिः, तन्त्रपरीक्षोपपत्तिः, यन्त्राध्यायोपपत्तिः, बिम्बाधिकारोपपत्तिः, करणगणितोपपत्तिः चेत्यादिग्रहगणितीयोपपत्तीः ज्ञात्वा ग्रहगणिते सम्प्रति कथं परिष्कारः विधेयः इत्यस्मिन् विषये जागरूकाः सन्तः स्वयं परिष्कर्तुं सक्षमाः भविष्यन्ति।

कार्यक्रमस्य वैशिष्ट्यम्

(Graduate Attributes of the Program)

अयं सिद्धान्तज्यौतिषस्य आचार्यकार्यक्रमः छात्रेषु संस्कृतभाषासंवर्धनं, शास्त्रानुरागम्, अनुसन्धानदक्षतां, प्रयोगकौशलं, वैज्ञानिकदृष्टिं च विस्तारयितुं, भारतीयज्ञानपरम्परायां ग्रहगणितस्य उपपत्तीः सम्यग्ज्ञापयितुं च सहकरोति, तद्द्वारा भारतस्य प्राचीनपरम्परायाः स्रोतसः वैशिष्ट्यं समग्रे विश्वे द्योतयितुम् उपकरोति।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीय मूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
भगणोपपत्तिः ग्रहस्पष्टीकरणोपपत्तिश्च	✓	✓	✓	✓	✓	✓	✓
दिग्देशकालसाधनोपपत्तिः	✓	✓	✓	✓	✓	✓	✓
ग्रहणोपपत्तिः	✓	✓	✓	✓	✓	✓	✓
युत्युदयास्तशृङ्गोन्नतिपातोपपत्तिः	✓	✓	✓	✓	✓	✓	✓
ब्राह्मस्फुटसिद्धान्ताधारेण तन्त्रपरीक्षोपपत्तिः	✓	✓	✓	✓	✓	✓	✓
सिद्धान्ततत्त्वविवेकाधारेण बिम्बोपपत्तिः छायोपपत्तिश्च	✓	✓	✓	✓	✓	✓	✓
करणगणितोपपत्तिः	✓	✓	✓	✓	✓	✓	✓
ग्रहगणितपरिष्कारविधिः	✓	✓	✓	✓	✓	✓	✓

चितस्वशास्त्रविषयकपाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR DSE COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
ज्योतिर्मीमांसा ग्रहणमण्डनं गोलसारश्च	✓	✓	✓	✓	✓	✓	✓
सिद्धान्तसम्राट् (प्रथमः भागः)	✓	✓	✓	✓	✓	✓	✓
भद्रगणितम्	✓	✓	✓	✓	✓	✓	✓
ज्योतिर्गणितम् (प्रथमः परिच्छेदः)	✓	✓	✓	✓	✓	✓	✓
ब्राह्मस्फुटसिद्धान्ते क्षेत्रव्यवहारः कुट्टकञ्च	✓	✓	✓	✓	✓	✓	✓
सिद्धान्तसम्राट् (द्वितीयः भागः)	✓	✓	✓	✓	✓	✓	✓
रेखागणितम्	✓	✓	✓	✓	✓	✓	✓
ज्योतिर्गणितम् (द्वितीयः परिच्छेदः)	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 1.1: भगणोपपत्तिः ग्रहस्पष्टीकरणोपपत्तिश्च	4	600-699
2		प्रधानः 1.2: दिग्देशकालसाधनोपपत्तिः	4	600-699
3		प्रधानः 1.3: ग्रहणोपपत्तिः	4	600-699
4		प्रधानः 1.4: युत्युदयास्तशृङ्गोन्नतिपातोपपत्तिः	4	600-699
5	द्वितीयसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 2.1: ब्राह्मस्फुटसिद्धान्ताधारेण तन्त्रपरीक्षोपपत्तिः	4	600-699
6		प्रधानः 2.2: सिद्धान्ततत्त्वविवेकाधारेण बिम्बोपपत्तिः छायोपपत्तिश्च	4	600-699
7		प्रधानः 2.3: करणगणितोपपत्तिः	4	600-699
8		प्रधानः 2.4: ग्रहगणितपरिष्कारविधिः	4	600-699

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य चितस्वशास्त्रविषयक -पाठ्यकमाः	चितस्वशास्त्रविषयः 1.क.1: ज्योतिर्मीमांसा ग्रहणमण्डनं गोलसारश्च	4	600-699
2		चितस्वशास्त्रविषयः 1.क.2: सिद्धान्तसम्राट् (प्रथमः भागः)	4	600-699
3		चितस्वशास्त्रविषयः 1.क.3: भद्रगणितम्	4	600-699
4		चितस्वशास्त्रविषयः 1.क.4: ज्योतिर्गणितम् (प्रथमः परिच्छेदः)	4	600-699
5	द्वितीयसत्रार्द्धस्य चितस्वशास्त्रविषयक -पाठ्यकमाः	चितस्वशास्त्रविषयः 2.क.1: ब्राह्मस्फुटसिद्धान्ते क्षेत्रव्यवहारः कुट्टकञ्च	4	600-699
6		चितस्वशास्त्रविषयः 2.क.2: सिद्धान्तसम्राट् (द्वितीयः भागः)	4	600-699
7		चितस्वशास्त्रविषयः 2.क.3: रेखागणितम्	4	600-699
8		चितस्वशास्त्रविषयः 2.क.4: ज्योतिर्गणितम् (द्वितीयः परिच्छेदः)	4	600-699

प्रधानपाठ्यक्रमाः

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: भगणोपपत्तिः ग्रहस्पष्टीकरणोपपत्तिश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. युगे कल्पे वा ग्रहाणां भगणसंख्यानिर्धारणक्रमज्ञानम्।
2. ग्रहानयने बहुविधप्रकाराणाम् अध्ययनम्।
3. प्रत्यब्दशुद्धेः अवमाधिकमासयोश्च सोपपत्ति अवगमनम्।
4. ग्रहस्फुटीकरणप्रयोजनस्य तदुपपत्तेश्च अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्रत्येकं सिद्धान्ते ग्रहभगणानां व्यत्यासे कारणं ज्ञातुं समर्थाः भविष्यन्ति।
2. प्रत्यब्दशुद्धिगणितं विज्ञाय लघुना उपायेन ग्रहाणामानयनं कथं कर्तव्यमिति ज्ञानं सम्पादयिष्यन्ति।
3. मध्यगतेः वासनां, नीचोच्चवृत्त-प्रतिवृत्त-मिश्रभङ्गीभिः स्पष्टगतेः वासनां च अधिगमने दक्षाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	भगणोपपत्तिः ग्रहस्पष्टीकरणोपपत्तिश्च	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सिद्धान्तशिरोमणेः भगणाध्यायः भगणवासना च। **श्रेयोऽङ्कः १**

- कल्पे ग्रहाणां मन्दोच्चानां पातानां च भगणाः।
- भगणसंख्यानिर्धारणक्रमः।
- भभ्रम-कुदिन-सूर्याह-चन्द्राहाः।
- अधिमासावमसंख्याः, तदुपपत्तिश्च।

अन्वितिः २. सिद्धान्तशिरोमणेः ग्रहानयनाध्यायश्च। **श्रेयोऽङ्कः १**

- अहर्गणोपपत्तिः।
- ग्रहसाधने बहुविधप्रकाराः।
- अवमशेषात् चन्द्रानयनम्।

- अधिमासावमशेषाभ्यां रविचन्द्रानयनम्।
- मध्यग्रहात् अहर्गणानयनम्।
- अहर्गणात् कल्पगतज्ञानम्।
- ग्रहाणां बीजकर्म।

अन्वितिः ३. सिद्धान्तशिरोमणेः स्पष्टाधिकारस्य विशेषाः। **श्रेयोऽङ्कः १**

- लघुज्याः।
- भोग्यखण्डस्पष्टीकरणम्।
- रवीन्द्वोः कुजादीनां च स्फुटीकरणप्रक्रिया।
- प्रकारचतुष्टयेन कर्णानयनम्।
- गतिफलानयनं तत्र लल्लमतखण्डनञ्च।
- वक्रतासम्भवः उदयास्तसम्भवश्च।
- पञ्चज्यानयनम्।
- चरकर्म।
- लङ्कोदयसाधने त्रयः प्रकाराः।
- भुजान्तरम्।
- उदयान्तरम्।
- सूक्ष्मनक्षत्रानयनम्।

अन्वितिः ४. गोलाध्याये मध्यगतिवासना स्पष्टगतिवासना च। **श्रेयोऽङ्कः १**

- भूमेरुपरि सप्त वायुस्कन्धाः।
- मध्यस्पष्टसावनयोः भेदः।
- अधिमासावमयोः उपपत्तिः।
- उदयान्तरकर्मोपपत्तिः।
- देशान्तरोपपत्तिः।
- नीचोच्चवृत्तभङ्गिः प्रतिवृत्तभङ्गिः मिश्रभङ्गिश्च।
- मन्दकर्मणि कर्णत्यागे कारणम्।
- नतकर्मवासना।
- गतिफलाभावस्थानकथनम्।
- भुजान्तरकर्मोपपत्तिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Sri Bapudeva Shastri, Ed. (2005), सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः) Choukhamba Sanskrit Sansthan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sri Kapileshvara Shastri, (1946), सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः), Varanasi: Chaukhamba Sanskrit Series Office.
2. Krishnachandra Dwivedi, Ed. (1966), सिद्धान्ततत्त्वविवेकः, Varanasi: Sampurnananda Sanskrit Vishwavidyalay.
3. Babuvaji Mishra, (Part-1-1932 & Part-2-1947), *सिद्धान्तशेखरः*, University of Calcutta.

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: दिग्देशकालसाधनोपपत्तिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. दिग्देशकालसाधनगणितस्य उपपत्तिज्ञानम्।
2. ग्रहच्छायासाधनस्य प्रकाराणाम् अवगमनम्।
3. ग्रहवेधोपकरणानां साधनानाम् अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. लग्नसाधनोपपत्तिं दिक्साधनोपपत्तिम् अक्षक्षेत्रानुपातोपपत्तिं च सालेख्यं प्रतिपादयितुं समर्थाः भविष्यन्ति।
2. इष्टकाले छायानयनं, छायातः इष्टकालसाधनम्, इष्टच्छायातः ग्रहानयनं च कथं कर्तव्यमिति ज्ञास्यन्ति। समेषामेतेषां सोपपत्ति निरूपणं कर्तुं सामर्थ्यं प्राप्स्यन्ति।
3. ग्रहच्छायादिविषये पूर्वाचार्याणां मतं भृशं परिशील्य सम्प्रति काले छायागणितवैचित्र्यं लोके साधारं प्रदर्शयितुं पटवः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	दिग्देशकालसाधनोपपत्तिः	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सिद्धान्तशिरोमणेः त्रिप्रश्नाधिकारः - १ **श्रेयोऽङ्कः १**

- लग्नानयनोपपत्तिः।
- दिक्साधनोपपत्तिः।
- अक्षक्षेत्राणि तदनुपाताश्च।
- दिङ्नियमेन छायानयनं (कोणशङ्कु-दिनार्धशङ्कु-अन्त्या-हृति-दिग्ज्या-दिनार्धकर्ण-उन्मण्डलकर्ण-समकर्णानुपातोपपत्तयः)
- इच्छादिक्च्छायानयनम्।
- कालनियमेन छायानयनम्।

अन्वितिः २. सिद्धान्तशिरोमणेः त्रिप्रश्नाधिकारः - २ **श्रेयोऽङ्कः १**

- छायातः कालज्ञानं रविसाधनं च।

- क्रान्तेः पलभाज्ञानम्।
- छायातः भुजानयनम्।
- छायाप्रश्नः।
- सममण्डलप्रश्नः।
- इष्टप्रभाप्रश्नः।
- अन्ये प्रश्नाः, ग्रहावलोकनप्रकारः च।

अन्वितिः ३. सिद्धान्तशिरोमणेः गोलाध्याये त्रिप्रश्नवासना। **श्रेयोऽङ्कः १**

- चरफलोपपत्तिः।
- दिननिशोः लघुमहत्त्वे हेतुः।
- देवासुराणां दिनरात्रस्वरूपे संहितामतविमर्शः।
- पितृदिनोपपत्तिः।
- ब्राह्मदिनोपपत्तिः।
- चरखण्डैरुदयासूनां न्यूनाधिक्ये कारणम्।
- लग्नार्थम् अर्कतात्कालिकीकरणस्य वासना।
- देशविशेषेण सदोदितराशयः तत्र लल्लमतखण्डनञ्च।
- अक्ष-लम्ब-अग्रा-क्रान्तिक्षेत्राणि।

अन्वितिः ४. सिद्धान्ततत्त्वविवेकस्य त्रिप्रश्नाधिकारस्य विशेषाः। **श्रेयोऽङ्कः १**

- गोलावयवानां नाडीवृत्तादीनां ज्ञानम्।
- वृत्तद्वयपरमान्तरकथनम्।
- कुच्छन्नचापसाधनम्।
- समविषमकोण-चापीयत्रिभुजादिलक्षणम्।
- विषवांशज्ञानप्रकाराः।
- पृष्ठक्षितिजानुरोधेन सदोदितत्वलक्षणम्।
- दृष्ट्युच्छ्रिति-दृश्यांशसाधनप्रकारः।
- रविभुजपदव्यवस्था।
- वृत्तविशेषवशेन शङ्कोः विशेषत्वं भास्करोक्तशङ्कुलक्षणविमर्शश्च।
- असम्भवसमशङ्कुस्वरूपकथनम्।

- कपालभेदेन भाद्वयसम्भवासम्भवविमर्शः।
- बिम्बीयनतांशवशेन भासाधनम्।
- अन्येषामाचार्याणामुपरि आक्षेपः मतभेदः स्वमतनिरूपणं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Sri Bapudeva Shastri, Ed. (2005), *सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः)* Choukhamba Sanskrit Sansthan.
2. Krishnachandra Dwivedi, Ed. (1966), *सिद्धान्ततत्त्वविवेकः*, Varanasi: Sampurnananda Sanskrit Vishwavidyalay.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sri Kapileshvara Shastri, (1946), सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः), Varanasi: Chaukhamba Sanskrit Series Office.
2. Babuvaji Mishra, (Part-1-1932 & Part-2-1947), *सिद्धान्तशेखरः*, University of Calcutta.

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: ग्रहणोपपत्तिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. रविचन्द्रयोः ग्रहणस्य सम्भवासम्भवज्ञानम्।
2. रविचन्द्रयोः ग्रहणयोः भेदानामवगमनम्।
3. ग्रहणगणितस्य उपपत्तिविज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. स्वयं ग्रहणगणितं कर्तुं सामर्थ्यं प्राप्स्यन्ति, गणितस्य कारणमपि वक्तुं पटवः भविष्यन्ति।
2. ग्रहणे राहोः कारणत्वम् उत अन्यस्य इति प्राचीनाचार्यैः सूक्ष्मेक्षिकया यत् विमृष्टं तस्य प्रतिपादने दक्षाः भविष्यन्ति।
3. उत्क्रमज्यया वलनानयने दोषाः कथं भवन्तीति भास्कराचार्यस्य मतं परिशीलयितुं पाटवं प्राप्स्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	ग्रहणोपपत्तिः	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सिद्धान्तशिरोमणेः पर्वसम्भवाधिकारः **श्रेयोऽङ्कः १**

- चन्द्रग्रहसम्भवः, सूर्यग्रहसम्भवः, पर्वसम्भवोपपत्तिः च।

अन्वितिः २. सिद्धान्तशिरोमणेः चन्द्रसूर्यग्रहणाधिकारौ। **श्रेयोऽङ्कः १**

- ग्रहणोपकरणानां कक्षाव्यासार्ध-योजनात्मककर्ण-कलाकर्ण-रविचन्द्रभूभाबिम्ब-चन्द्रशराणामानयनस्य उपपत्तिः।
- ग्रासमानस्य स्थित्यर्धविमर्दार्धयोः तत्स्फुटीकरणस्य चोपपत्तिः।
- वलनोपपत्तिः।
- ग्रहणपरिलेखोपपत्तिः।
- अनादेश्यग्रहणविमर्शः।
- सूर्यग्रहणे लम्बनस्य नतेः च साधनक्रमः तदुपपत्तिश्च।

अन्वितिः ३. सिद्धान्तशिरोमणेः गोलाध्याये ग्रहणवासना। **श्रेयोऽङ्कः १**

- रविचन्द्रयोः ग्रहणे स्पर्शमोक्षयोः दिग्व्यत्यासे कारणम्।
- नतिलम्बनयोः कारणम्।
- छादकनिर्णयः तत्र ग्रहणे राहोः कारणत्वविमर्शः।
- लम्बनोपपत्तिः।
- नत्युपपत्तिः, स्फुटलम्बनवासना, वलनवासना, वलनानयने उत्क्रमज्यानिरासश्च।

अन्वितिः४. सिद्धान्ततत्त्वविवेकस्य ग्रहणाधिकारस्य विशेषाः। **श्रेयोऽङ्कः १**

- पर्वसम्भवाधिकारस्य विशेषाः।
- चन्द्रग्रहणाधिकारगतविशेषाः।
- सूर्यग्रहणाधिकारगतविशेषाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Krishnachandra Dwivedi, Ed. (1966), *सिद्धान्ततत्त्वविवेकः*, Varanasi: Sampurnananda Sanskrit Vishwavidyalay.
2. Sri Bapudeva Shastri, Ed. (2005), *सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः)* Choukhamba Sanskrit Sansthan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sri Kapileshvara Shastri, (1946), सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः), Varanasi: Chaukhamba Sanskrit Series Office.
2. Babuvaji Mishra, (Part-1-1932 & Part-2-1947), *सिद्धान्तशेखरः*, University of Calcutta.

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: युत्युदयास्तशृङ्गोन्नतिपातोपपत्तिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ग्रहयुतेः भग्रहयुतेश्च उपपत्तिज्ञानम्।
2. उदयास्तयोः चन्द्रशृङ्गोन्नतेश्च उपपत्तिज्ञानम्।
3. ग्रहयुत्यादीनां सम्भवस्य प्रदर्शनम्।
4. महापातयोः वासनापरिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ग्रहाणां परस्परं युतेः भेदान्, ग्रहयद्धे जयपराजययोः लक्षणं च ज्ञात्वा तं विषयम् अन्येभ्यः प्रतिपादयितुं कुशलाः भविष्यन्ति।
2. युतिगणितं विधाय आकाशे ग्रहयुतिं साक्षात् दर्शयितुं प्रवीणाः भविष्यन्ति।
3. संहिताग्रन्थेषु प्रतिपादितस्य ग्रहयुद्धफलस्य चन्द्रशृङ्गोन्नतिफलस्य च याथातथ्यं भृशं परिशीलयितुं सक्षमाः भविष्यन्ति।
4. शुभकर्मणि वर्ज्यस्य गुरुशुक्रयोः अस्तकालस्य महापकालस्य च आनयनं कृत्वा स्वकीयगणितस्य शुद्धिं परीक्षितुं सामर्थ्यं प्राप्स्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	युत्युदयास्तशृङ्गोन्नतिपातोपपत्तिः	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सिद्धान्तशिरोमणेः युति-उदयास्त-शृङ्गोन्नत्यधिकाराः तद्वासनाश्च। श्रेयोऽङ्कः १

- ग्रहाणां बिम्बमानानि।
- युतिकालसाधनम्।
- स्फुटदक्षिणोत्तरान्तरज्ञानम्।
- युतिभेदाः।
- भध्रुवकाः शराश्च।
- कालव्यत्यासेन भध्रुवकाणां स्फुटीकरणप्रक्रिया।

- नक्षत्रोदयास्तज्ञानम्।
- दैनिकोदयास्तः अर्कासन्नोदयास्तश्च।
- ग्रहाणां नक्षत्राणां च कालांशाः।
- गोलाध्याये युतिवासना शृङ्गोन्नतिवासना च।

अन्वितिः २. सिद्धान्तशिरोमणेः पाताधिकारः (सोपपत्तिकः) **श्रेयोऽङ्कः १**

- सूर्याचन्द्रमसोः गोलायनसन्धिज्ञानम्।
- सामान्यक्रान्तिसाम्यसम्भवः।
- महापातलक्षणम्।
- क्रान्तिसाम्यस्य गतैष्यत्वप्रतिपादनम्।
- पातस्थित्यर्धविमर्दार्धयोरानयनम्।

अन्वितिः ३. सिद्धान्ततत्त्वविवेकस्य भग्रहयुत्यधिकारस्य विशेषाः। **श्रेयोऽङ्कः १**

- भग्रहयुतौ कमलाकरभट्टेन प्रतिपादितानाम् अन्येषामाचार्याणां मतानां विवेचनम्।

अन्वितिः ४. सिद्धान्ततत्त्वविवेकस्य महाप्रश्नाधिकारस्य विशेषाः। **श्रेयोऽङ्कः १**

- दिग्देशकालादिविषयकाः सोत्तराः प्रश्नविशेषाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Krishnachandra Dwivedi, Ed. (1966), *सिद्धान्ततत्त्वविवेकः*, Varanasi: Sampurnananda Sanskrit Vishwavidyalay.
2. Sri Bapudeva Shastri, Ed. (2005), *सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः)* Choukhamba Sanskrit Sansthan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sri Kapileshvara Shastri, (1946), सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः), Varanasi: Chaukhamba Sanskrit Series Office.
2. Babuvaji Mishra, (Part-1-1932 & Part-2-1947), *सिद्धान्तशेखरः*, University of Calcutta.

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 2.1: ब्राह्मस्फुटसिद्धान्ताधारेण तन्त्रपरीक्षोपपत्तिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ब्राह्मस्फुटसिद्धान्तस्य वैशिष्ट्यज्ञानम्।
2. ब्राह्मस्फुटसिद्धान्तस्य गणितप्रक्रियाणाम् अध्ययनम्।
3. ब्राह्मस्फुटसिद्धान्तस्य तन्त्रपरीक्षाध्याय-ग्रहोपदेशाध्यायादीनां विमर्शनम्।
4. गणितकाराणां परस्परं मतभेदस्य तत्कारणानां च परिशीलनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आर्यभटस्य युगप्रमाणादिभेदे कारणं ज्ञातुं समर्थाः भविष्यन्ति।
2. दृगुपलब्ध्यभावे सति गणितं कथं परिष्कर्तव्यमिति निरूपयिष्यन्ति।
3. बहुभिः प्रकारैः ध्रुवक-क्षेपकयोः साधनक्रमम् अवगन्तुं समर्थाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रम-कूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	ब्राह्मस्फुटसिद्धान्ताधारेण तन्त्रपरीक्षोपपत्तिः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ब्राह्मस्फुटसिद्धान्तस्य तन्त्रपरीक्षाध्यायः। **श्रेयोऽङ्कः १**

- युगादिभेदे संहिताकार-जैन-आर्यभटादीनां मतखण्डनम्।
- मन्दोच्चपातानामस्थिरत्वम्।
- आर्यभटप्रतिपादितानां राहु-कल्पादिवार-वारप्रवृत्ति-भूव्यास-मन्दशीघ्रपरिधि-सममण्डलप्रवेश-नतिलम्बन-चन्द्रदिनगतशेष-दृक्कर्मादिविषयाणां खण्डनम्।
- श्रीषेणविष्णुचन्द्रकतसूर्यग्रहणखण्डनम्।
- स्थिरपातमन्दोच्चखण्डनम्।
- विष्णुचन्द्रादीनाम् अयनचलनदूषणम्।
- निजसिद्धान्तोत्कर्षप्रतिपादनं च।

अन्वितिः २. ब्राह्मस्फुटसिद्धान्तस्य मध्य-स्पष्टगति-त्रिप्रश्नोत्तराध्यायाः। **श्रेयोऽङ्कः १**

- मध्यगत्युत्तराध्यायगताः सोत्तराः प्रश्नाः।
- स्फुटगत्युत्तराध्यायगताः सोत्तराः प्रश्नाः।
- त्रिप्रश्नोत्तराध्यायगताः सोत्तराः प्रश्नाश्च।

अन्वितिः ३. ब्राह्मस्फुटसिद्धान्तस्य यन्त्राध्यायः। **श्रेयोऽङ्कः १**

- गोलयन्त्रम्।
- धनुर्यन्त्रम्।
- तुर्ययन्त्रम्।
- चक्रयन्त्रम्।
- घटिकायन्त्रम्।
- यष्टियन्त्रम्।
- शङ्कुयन्त्रम्।
- कपालयन्त्रम्।
- कर्तरीयन्त्रम्।
- पीठयन्त्रम्।
- स्वयंवहयन्त्र च।

अन्वितिः ४. ब्राह्मस्फुटसिद्धान्तस्य संज्ञाध्यायः ध्यानग्रहोपदेशाध्यायश्च। **श्रेयोऽङ्कः १**

- सिद्धान्तस्य एकत्वनिरूपणम्।
- सूर्यसिद्धान्तादीनां भिन्नत्वम्।
- सूर्यग्रहणे चन्द्रशङ्कोरभावकथनम्।
- चैत्रादौ मासगणानयनम्।
- तिथिध्रुवकादिसाधनम्।
- इष्टमासादौ रव्यादीनामानयनम्।
- रवि-चन्द्र-केन्द्राणां राशिमानादिकथनम्।
- तिथौ फलसंस्कारः।
- केन्द्रतः एव मन्दफलानयनम्।
- प्रकारान्तरैः ग्रहादीनामानयनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. भास्कराचार्यः, (1966), *ब्राह्मस्फुटसिद्धान्तः*, सम्पादकः - आचार्य रामस्वरूप शर्मा, नयी दिल्ली : Indian Institute of Astronomical & Sanskrit Research.

सहायकाः ग्रन्थाः (Additional Readings)

1. कपिलेश्वर शास्त्री, (1946), *सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः)*, वाराणसी : चौखम्बा संस्कृत सीरीज़ ऑफिस।
2. बाबुवाजी मिश्रः, (1932, 1947), *सिद्धान्तशेखरः*, कलकत्ता : कलकत्ता विश्वविद्यालयः (भाग १ - १९३२, भाग २ - १९४७)
3. बापुदेव शास्त्री, (2005), *सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः)*, वाराणसी : चौखम्बा संस्कृत संस्थान।
4. कृष्णचन्द्र द्विवेदी, (1966), *सिद्धान्ततत्त्वविवेकः*, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: सिद्धान्ततत्त्वविवेकाधारेण बिम्बोपपत्तिः छायोपपत्तिश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ग्रहबिम्बसाधनगणितस्य उपपत्तिज्ञानम्।
2. ग्रहबिम्बविषये प्राचीनाचार्याणां मतभेदविमर्शनम्।
3. छायास्वरूपच्छायादैर्घ्यादिविषयाणाम् अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दिने नक्षत्राणां दृष्यादृष्यत्वम्, अर्कोर्ध्वबिम्बानां सदोज्वलत्वम्, बिम्बस्य वास्तविकं स्वरूपम् इत्यादिविषयाणाम् प्रतिपादने कुशलाः भविष्यन्ति।
2. दृष्टिस्थानं भूगर्भाभिप्रायिकं पृष्टाभिप्रायिकं वेति सोपपत्ति निरूपयितुं सामर्थ्यं प्राप्स्यन्ति।
3. ग्रहच्छायादिविषये पूर्वाचार्याणां मतं विज्ञाय पृष्ठीयदृष्टिसूत्रादीनि साधयितुं पटवः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रम-कूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	सिद्धान्ततत्त्वविवेका-धारेण बिम्बोपपत्तिः छायोपपत्तिश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सिद्धान्ततत्त्वविवेकस्य बिम्बाधिकारः - १ **श्रेयोऽङ्कः १**

- ग्रहबिम्बानां दृश्यादृश्यत्वविचारः।
- रवीन्द्वोः बिम्बविषये व्यासमतम्।
- सूर्यबिम्बे सच्छिद्रताविमर्शः।
- बुधशुक्रयोः स्वतस्तैजसत्वखण्डनम्।
- बिम्बानाम् अणुत्वस्थूलत्ववर्णनम्।
- नीलगोलविषयवर्णनम्।
- वास्तवबिम्बसाधनम्।

- गर्भाभिप्रायिकबिम्बकलानयनं च।

अन्वितिः २. सिद्धान्ततत्त्वविवेकस्य बिम्बाधिकारः - २ **श्रेयोऽङ्कः १**

- मुनीश्वरोक्तबिम्बप्रदेशखण्डनम्।
- बिम्बस्थैर्यकथनम्।
- भास्कर-मुनीश्वरोक्तबिम्बकलासाधनखण्डनम्।
- नीलाम्बरगोले बिम्बवैचित्र्यवर्णनम्।
- भगोलीयबिम्बसाधनप्रकारः।
- ग्रहगोलीयबिम्बसाधनप्रकारः।
- बिम्बान्तरसाधने श्रीपतिभास्कराचार्यमतखण्डनम्।
- ग्रहणभेदनिरूपणम्।
- ग्रहान्नक्षत्रज्ञानम्।
- ग्रहयुतिदर्शनप्रकारः च।

अन्वितिः ३. सिद्धान्ततत्त्वविवेकस्य छायाधिकारः - १ **श्रेयोऽङ्कः १**

- छायास्वरूपम्।
- भायाः क्रमापचयत्वसूचनम्।
- बिम्बभादैर्घ्यसाधनम्।
- सितवृत्तीयान्तरांशसाधनम्।
- बिम्बान्तरसूत्रसाधनं तस्य परमाल्पत्वं च।
- छायासाधने भास्करमतखण्डनं च।

अन्वितिः ४. सिद्धान्ततत्त्वविवेकस्य छायाधिकारः - २ **श्रेयोऽङ्कः १**

- मुनीश्वरोक्तदृश्यभासाधनप्रकारः।
- मुनीश्वरमतेन छायातः नतांशसाधनप्रकारः।
- स्पष्टदृश्यच्छायानयनप्रकारः तत्र सार्वभौममतदूषणं च।
- नतांशसाधनम्।
- कुपृष्ठीयभायाः उपयोगितादर्शनम्।
- पृष्ठीयदृष्टिसूत्रसाधनपूर्वकं सिद्धान्तसार्वभौममतनिराकरणम्।

- बिम्बे आसन्नमध्यमध्यबिन्दुगतकिरणवशेनैव।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. कृष्णचन्द्र द्विवेदी, (1966), *सिद्धान्ततत्त्वविवेकः*, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

सहायकाः ग्रन्थाः (Additional Readings)

1. कपिलेश्वर शास्त्री, (1946), *सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः)*, वाराणसी : चौखम्बा संस्कृत सीरीज़ आफिस।
2. बाबुवाजी मिश्र, (1932-1947), *सिद्धान्तशेखरः*, कोलकाता : यूनिवर्सिटी ऑफ़ कलकत्ता।
3. बापुदेव शास्त्री, (2005), *सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः)*, वाराणसी : चौखम्बा संस्कृत संस्थान।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: करणगणितोपपत्तिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. सिद्धान्तकरणग्रन्थयोः गणितभेदानाम् अवगमनम्।
2. करणग्रन्थस्य लाघवत्वे उपपत्त्यवगमनम्।
3. बहूनां करणग्रन्थानां गणितप्रकारस्य उपपत्तेः अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सम्प्रति गणिते दशमलवं गृहीत्वा करणग्रन्थानां परिष्करणं विधातुं पटवः भविष्यन्ति।
2. करणगणितस्य सूत्राणि उपयुज्य तन्त्रांशानां निर्माणे दक्षाः भविष्यन्ति।
3. करणगणितस्य सौष्ठवम् अभ्यस्य बहुभिः प्रकारैः गणितं तदुपपत्तीश्च साधयितुं प्रावीण्यं प्राप्स्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रम-कूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	करणगणितोपपत्तिः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ग्रहलाघवस्य केतकीग्रहगणितस्य च उपपत्तीनामध्ययनम् - १ श्रेयोऽङ्कः १

- मध्यमाधिकार-रविचन्द्रस्पष्टाधिकार-पञ्चतास्पष्टाधिकारपर्यन्तभागानाम् उपपत्तीनाम् अध्ययनम्।
- (विशेषतया तत्तद्गुणकभाजकादीनां स्वीकरणे गणितोपपत्तिः द्रष्टव्या) उभयोः करणग्रन्थयोः तुलना च।

अन्वितिः २. ग्रहलाघवस्य केतकीग्रहगणितस्य च उपपत्तीनामध्ययनम् - २ श्रेयोऽङ्कः १

- ग्रहलाघवस्य रविचन्द्रग्रहणाधिकार-मासगणाधिकार-ग्रहणद्वयसाधनाधिकार-पञ्चाङ्गचन्द्रग्रहणाधिकाराणाम् उपपत्तीनाम् अध्ययनम्।
- ग्रहलाघवस्य केतक्याः ग्रहणगणितेन सह तुलना च।

अन्वितिः ३. खण्डखाद्यक-करणप्रकाशयोः उपपत्तीनामध्ययनम्। श्रेयोऽङ्कः १

- खण्डखाद्यके तिथिनक्षत्र-ग्रहगति-ग्रहणाध्यायानामुपपत्तिः।
- करणप्रकाशे मध्य-स्पष्टाधिकारयोरुपपत्तिः च।

अन्वितिः ४. भास्वतीकरण-मकरन्दसारिण्योः उपपत्तीनामध्ययनम्। **श्रेयोऽङ्कः १**

- भास्वतीकरणे तिथ्यादिध्रुवाधिकार-ग्रहध्रुवाधिकार-पञ्चाङ्गस्पष्टाधिकाराणाम् उपपत्तिः।
- मकरन्दसारिण्यनुसारं पञ्चाङ्गानयनक्रमश्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. गङ्गाधरः, (1867), *मकरन्दसारिणी*, मुम्बई : लक्ष्मीवेंकटेश्वर स्टीम प्रेस।
2. सुधाकर द्विवेदी, (1899), *करणप्रकाशः*, बनारस : चौखम्बा संस्कृत सीरीज़।
3. मातृप्रसाद पाण्डेयः, (1917), *भास्वती (शतानन्दकृता)*, बनारस सिटी : एच. डी. गुप्ता ॲण्ड सन्स, चौखम्बा संस्कृत सीरीज़ आफ़िस।
4. बीना चटर्जी, (1970), *खण्डखाद्यकम् (भट्टोत्पलविवृतिसहितम्)*, दिल्ली : बीना चटर्जी।
5. भारतीय विद्या प्रकाशन, (2001), *केतकीग्रहगणितम् (अङ्कविवृतिव्याख्योपेतम्)*, वाराणसी।
6. केदारदत्त जोशी, (2006), *ग्रालाघवम् (मल्लारि-विश्वनाथयोः व्याख्योपेतम्)*, दिल्ली : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. बाबुवाजी मिश्र, (1932, 1947), *सिद्धान्तशेखरः*, कलकत्ता : यूनिवर्सिटी ऑफ़ कलकत्ता (भाग १ - १९३२, भाग २–१९४७)
2. श्री कपिलेश्वर शास्त्री, (1946), *सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः)*, वाराणसी : चौखम्बा संस्कृत सीरीज़ ऑफिस।
3. कृष्णचन्द्र द्विवेदी, (1966), *सिद्धान्ततत्त्वविवेकः*, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।
4. श्री बापूदेव शास्त्री, (2005), *सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः)*, वाराणसी : चौखम्बा संस्कृत संस्थान।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.4: ग्रहगणितपरिष्कारविधिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. सिद्धान्तद्वारा ग्रहसाधने लक्षितानां दोषाणां निवारणम्।
2. पूर्वाचार्यैः दृग्गणितैक्यसाधनाय कृतानां प्रयासानां सार्थक्यसम्पादनम्।
3. स्वकृतनूतनगणितस्य शुद्धिपरीक्षणम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. पूर्वाचार्यैः प्रदर्शितमार्गानुसारेण स्वयं नूतनं गणितं कर्तुं समर्थाः प्रभविष्यन्ति।
2. नूतनतया ध्रुवक-क्षेपकादीन् प्रसाध्य शुद्धं गणितं लोके प्रसारयितुं समर्थाः भविष्यन्ति।
3. पाश्चात्त्यानां गणितस्य अपेक्षां विना भारतीयपरम्परामाश्रित्य एव ग्रहगणितं शुद्धं कर्तुं कौशलं प्राप्स्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रम-कूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	ग्रहगणितपरिष्कारविधिः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सिद्धान्तमतमाश्रित्य मध्यमाधिकारस्य परिष्कारः। **श्रेयोऽङ्कः १**

- प्रस्तुतं वर्षदैर्घ्यमादाय सिद्धान्तमार्गमवलम्ब्य भगणादीनां परिष्कारः।
- परिष्कृतभगणेभ्यः मध्यमग्रहानयनम्।
- अन्तरपरिशीलनं च।

अन्वितिः २. सिद्धान्तमतमाश्रित्य स्पष्टाधिकारस्य परिष्काराः। **श्रेयोऽङ्कः १**

- सूर्याचन्द्रमसोः मन्दपरिधेः परिष्करणम्।
- कुजादीनां मन्दशीघ्रपरिध्योः परिष्करणम्।
- तद्वशात् फलमानीय ग्रहेषु फलं संस्कृत्य अन्तरपरिसशीलनं च।

अन्वितिः ३. करणरीत्या परिष्कारः। **श्रेयोऽङ्कः १**

- अभीष्टवर्षादौ ध्रुवकं प्रसाध्य वर्षगणादिकरणगणितनियमानुसारं ग्रहाणां परिष्कृतिः।
- तेषां परिशीलनं च।

अन्वितिः ४. परिष्कृतग्रहाणां परिशीलनम्। **श्रेयोऽङ्कः १**

- त्रिप्रश्नोक्तप्रकारेण पूर्वसाधितग्रहाणाम् अन्तरपरिशीलनम्।
- रवीन्द्वोः ग्रहणपरिशीलनम्।
- युत्यादिपरिशीलनं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. कृष्णचन्द्र द्विवेदी, (1966), *सिद्धान्ततत्त्वविवेकः*, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।
2. केतकीग्रहगणितम् (अङ्कविवृतिव्याख्योपेतम्), (2001), वाराणसी : भारतीय विद्या प्रकाशन।
3. श्री बापूदेव शास्त्री, (2005), *सिद्धान्तशिरोमणिः (वासनाभाष्योपेतः)*, वाराणसी : चौखम्बा संस्कृत संस्थान।
4. केदारदत्त जोशी, (2006), *ग्रालाघवम् (मल्लारि-विश्वनाथयोः व्याख्योपेतम्)*, दिल्ली : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. भट्ट कपिलेश्वर शास्त्री, (1946), *सूर्यसिद्धान्तः (तत्त्वामृतटीकोपेतः)*, वाराणसी : चौखम्बा संस्कृत सीरीज़ ऑफिस।
2. बाबूवाजी मिश्र, (1932–1947), *सिद्धान्तशेखरः*, कोलकाता : यूनिवर्सिटी ऑफ कलकत्ता।
3. आचार्य रामस्वरूप शर्मा, (1966), *ब्राह्मस्फुटसिद्धान्तः*, नई दिल्ली : Indian Institute of Astronomical & Sanskrit Research.

चितस्वशास्त्रविषयक-पाठ्यक्रमाः

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

चितस्वशास्त्रविषयः (DSE) 1.क.1: ज्योतिर्मीमांसा ग्रहणमण्डनं गोलसारश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ग्रहगणिते नीलकण्ठपरमेश्वराभ्यां निरूपितानां तत्त्वानाम् अध्ययनम्।
2. ग्रहगणिते केरलीयपद्धतेः वैशिष्ट्यस्य अवगमनम्।
3. ग्रहगणिते परिष्करणस्य अनिवार्यतायाः विमर्शनम्।
4. बीजसंस्कारस्य तत्कारणानां च परिशीलनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ज्योतिश्शास्त्रस्य शोधनात्मकत्व प्रयोगात्मकत्व च निरूपयितुं समर्थाः भविष्यन्ति।
2. दृगुपलब्ध्यभावे सति प्रादुर्भूतानां विभिन्नानां सिद्धान्तानां गणितं कथम् एकरूपता प्राप्नोतीति व्याख्यातुं शक्ताः भविष्यन्ति।
3. ग्रहणैः गणितशोधनप्रकारान् अवगन्तुं समर्थाः भविष्यन्ति।
4. भगणादीनां परिष्करणस्य अनिवार्यतां वैज्ञानिकदृष्ट्या वर्णनं कर्तुं शक्ष्यन्ति।
5. बीजसंस्कारस्य स्वरूपं प्रयोजनं च विवेक्तुं सामर्थ्यं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.1	ज्योतिर्मीमांसा ग्रहणमण्डनं गोलसारश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. नीलकण्ठप्रणीता ज्योतितर्मीमांसा-१. **श्रेयोऽङ्कः १**

- भगणादीनां परिष्कररणस्य अनिवार्यता।
- नूतनसिद्धान्तकरणे देवताप्रसादस्य आवश्यकता।
- परीक्षण-अनुमानादिभिः भगणनिर्णयः।
- करणग्रन्थानां वैशिष्ट्यम्।
- बीजसंस्कारः।

- भटसंस्कारप्रारम्भकालोपरि विमर्शः।
- तत्र लल्लकृतविपर्यासस्य समर्थनं।
- भगणसाम्येऽपि मध्यमभेदे हेतुः।
- अनुमानेन ग्रहगत्यवधारणे श्रुतेः प्रामाण्यम्।
- विभिन्नेषु सिद्धान्तेषु प्रतिपादिताः भगणादयः तेषु संस्कारश्च।

अन्वितिः २. नीलकण्ठप्रणीता ज्योतितर्मीमांसा-२. **श्रेयोऽङ्कः १**

- विभिन्नसिद्धान्तेषु पारस्परिकं सौक्ष्म्यशोधनं तत्र आर्यभटीयार्धरात्रिकसिद्धमध्यमानां शोधनम्।
- सिद्धान्तशेखरसिद्धमध्यमानां शोधनम्।
- सिद्धान्तशेखरे स्वीकृतचन्द्रोच्चपातयोः विशेषः।
- ग्रहणैः गणितशोधनप्रकारः।
- ग्रहाणां मन्दपरिधिस्फुटीकरणे विशेषः।
- अयनचलनम्।
- परिलेखद्वारा भुजकोटिकर्णानां सम्बन्धनिर्णयः।
- दृग्गोलगतमानेषु भगोललिप्तासम्पादनविमर्शः च।

अन्वितिः ३. परमेश्वरविरचितं ग्रहणमण्डनम्। **श्रेयोऽङ्कः १**

- ग्रन्थावतरणम्।
- मध्यमानयनम्।
- ध्रुवाणि।
- देशान्तरसंस्कारः।
- भुजफलसंस्कारः।
- चरार्धसंस्कारः।
- स्फुटक्रिया।
- बृहज्ज्याः।
- ग्रहणसम्भवः।
- ग्रहणस्वरूपम्।
- चन्द्रविक्षेयः।
- रविग्रहणे लम्बनम्।

- चन्द्रस्य स्फुटविक्षेपः।
- स्थित्यर्धम्।
- आयन-आक्ष-विक्षेप-स्फुटवलनानि।
- इष्टग्रासः।
- परिलेखः।
- अनादेश्यग्रहणानि।

अन्वितिः ४. नीलकण्ठविरचितः गोलसारः। **श्रेयोऽङ्कः १**

- गोलसारे प्रथम-द्वितीय-तृतीयपरिच्छेदाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Nīlakaṇṭha. (1977). *Jyotirmīmāṃsā* (K. V. Sharma, Ed.). V.V.B. Institute of Sanskrit & Indological Studies, Panjab University, Hoshiarpur.
2. Parameśvara. (1965). *Grahaṇamaṇḍanam* (K. V. Sharma, Ed.). V.V.B. Institute of Sanskrit & Indological Studies, Panjab University, Hoshiarpur.
3. Nīlakaṇṭha. (1970). *Golasāra* (K. V. Sharma, Ed.). V.V.B. Institute of Sanskrit & Indological Studies, Panjab University, Hoshiarpur.

सहायकाः ग्रन्थाः (Additional Readings)

1. Bapudeva Śāstrī, Śrī (Ed.). (1932–1947). *Siddhāntaśekharaḥ* (Parts 1–2, Ed. by Bābuvājī Miśra). University of Calcutta.
2. Kapileśvara Śāstrī, Śrī. (1946). *Sūryasiddhāntaḥ (Tattvāmṛtatīkā-sametaḥ)*. Chaukhamba Sanskrit Series Office.
3. Kṛṣṇacandra Dvivedī (Ed.). (1966). *Siddhāntatattvavivekaḥ*. Sampurnananda Sanskrit Vishvavidyalaya.
4. Śukla, K. S., & Sharma, K. V. (Eds.). (1976). *Āryabhaṭīyam*. Indian National Science Academy (INSA).
5. Bapudeva Śāstrī, Śrī (Ed.). (2005). *Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ)*. Choukhamba Sanskrit Sansthan.

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.2: सिद्धान्तसम्राट् (प्रथमः भागः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पूर्वकाले एव भारतवर्षात् बहिः अपि लोकव्यवहारे प्रचलितस्य ग्रहगणितक्रमस्य अध्ययनम्।
2. छायाक्षेत्राणां चापीयक्षेत्राणां च स्पष्टं परिज्ञानम्।
3. गोलयन्त्रद्वारा ग्रहवेधप्रकाराणाम् अवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. "मिजास्ती" इति अरबीभाषायां यत् गणितम् आसीत् यस्य च भाषान्तरीकरणं पण्डितजगन्नाथेन कृतं तस्य गणितप्रक्रियाम् अवगन्तुं समर्थाः प्रभविष्यन्ति।
2. ज्याचापादिरेखागणितसाध्यानां विषये प्राचीनानां मतानि लोके प्रसारयितुं समर्थाः भविष्यन्ति।
3. अस्माकं परम्परागतगणितस्य, पाश्चात्त्यानां गणितस्य च मध्ये विद्यमानं साम्यं वैषम्यं च अवगत्य तदनुरोधेन ग्रहगणितं परिष्कर्तुं कौशलं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.2	सिद्धान्तसम्राट् (प्रथमः भागः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सम्राट्सिद्धान्तस्य प्रथमः अध्यायः। **श्रेयोऽङ्कः १**

- भूम्याकाशयोर्वर्णनम्।
- भूमेर्गोलत्वादिनिरूपणम्।
- ज्याचापादिरेखागणितसाध्यम्।
- पूर्णज्योत्पादननिरूपणम्।
- अर्धज्यानयनप्रकाराः।
- अयनवृत्ते कर्कमकराहोरात्रवृत्तयोरन्तरसाधनम्।
- क्रान्ति-निरक्षोदयांशादिसाधनम् पञ्चदश क्षेत्राणि च।

अन्वितिः २. सम्राट्सिद्धान्तस्य द्वितीयः अध्यायः। **श्रेयोऽङ्कः १**

- पृथिव्यां मनुष्याणां सञ्चारप्रदेशवर्णनम्।
- अग्रासाधनम्।
- चापक्षेत्र-छायाक्षेत्रव्यवहाराः।
- वर्षे अक्षांशवशेन रवेः खमध्यभेदवर्णनम्।
- सायनमेषतुलामकरकर्कशङ्कुतः मध्याह्नच्छायावैशिष्ट्यम्।
- कालांश-अक्षांशयोः सारिणी।
- पञ्चविंशतिः क्षेत्राणि।

अन्वितिः ३. सम्राट्सिद्धान्तस्य तृतीयचतुर्थाध्यायौ। **श्रेयोऽङ्कः १**

- तृतीयाध्याये सूर्यचारनिरूपणम्।
- ग्रहगतावन्तरनिरूपणम्।
- रविमध्यमानयनाय सारिणी।
- अन्याः सारिण्यः।
- क्षेपकाः।
- ध्रुवकाः विंशतिः क्षेत्राणि।
- चतुर्थाध्याये चन्द्रचारनिरूपणम्।
- चन्द्रवेधप्रक्रिया।
- गतिनिरूपणम्।
- मध्यमगत्यादिसारिण्यः।
- मध्यमचन्द्रसूर्ययोः अन्तरगतिः।
- शरकेन्द्रगतिः।
- मन्दकेन्द्रगतिः।
- चन्द्रवर्षगत्यादिः।
- नव क्षेत्राणि।

अन्वितिः ४. सम्राट्सिद्धान्तस्य पञ्चमषष्ठाध्यायौ। **श्रेयोऽङ्कः १**

- पञ्चमाध्याये – गोलयन्त्रनिरूपणम्।
- चन्द्रस्य द्वितीयफलनिरूपणम्।

- भूकेन्द्र-प्रतिवृत्तयोरन्तरस्य निष्पत्तिः।
- अभिमुखकेन्द्रनिरूपणम्।
- मन्दफलसारिणीसाधनम्।
- सारिणीतः स्पष्टचन्द्रसाधनम्।
- चन्द्रलम्बनबोधकं यन्त्रम्।
- रवीन्द्वोः कर्णानयनम्।
- बिम्बमानानि।
- लम्बनसारिणी।
- विंशतिः क्षेत्राणि।
- षष्ठाध्याये – सारिण्यः।
- चन्द्रसूर्ययोः ग्रहणसाधनम्।
- सप्त क्षेत्राणि।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Śarma, Rāmasvarūpa (Ed.). (1967). Samrāṭsiddhāntaḥ. Indian Institute of Astronomical & Sanskrit Research.

सहायकाः ग्रन्थाः (Additional Readings)

1. Miśra, Bābuvājī (Ed.). (1932–1947). *Siddhāntaśekharaḥ* (Parts 1–2). University of Calcutta.
2. Kapileśvara Śāstrī, Śrī. (1946). *Sūryasiddhāntaḥ (Tattvāmṛtatīkā-sametah)*. Chaukhamba Sanskrit Series Office.
3. Śarmā, Rāmasvarūpa Ācārya (Ed.). (1966). *Brāhmasphuṭasiddhāntaḥ*. Indian Institute of Astronomical & Sanskrit Research.

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.3: भद्रगणितम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भद्रगणिते नारायणपण्डितस्य अन्येषामाचार्याणां च योगदानस्य अध्ययनं, गणितीयसौन्दर्यस्य च विश्लेषणम्।
2. प्राचीनभारतीयगणितपरम्परायाम् अतीव विस्मयजनकस्य मायाचतुरस्रस्य गणितीयतत्त्वानां परिज्ञानम्।
3. मायाचतुरस्रनिर्माणस्य विविधप्रकाराणां, नियमानां च उपस्थापनम्।
4. छात्रेषु गणनाशास्त्रविषये तार्किकरूपेण सर्जनात्मकचिन्तनस्य संवर्धनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भद्रगणितस्य परिभाषां, स्वरूपं, इतिहासं च स्पष्टरूपेण व्याख्यातुं समर्थाः भविष्यन्ति।
2. भारतीयाः न केवलं ग्रहगणितप्रपञ्चे कुशलाः, अपि तु शुद्धगणितप्रपञ्चे अपि निपुणाः आसन् इति उदाहरणमुखेन प्रतिपादयितुं सामर्थ्यं प्राप्स्यन्ति।
3. प्राचीनभारतीयानां गणितनवोन्मेषं लोके प्रपञ्चयितुं प्रावीण्यम् अर्जयिष्यन्ति।
4. मायाचतुरस्रनिर्माणस्य विविधप्रकाराणां, नियमानां च उपस्थापनं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.3	भद्रगणितम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भद्रगणितस्य स्वरूपम् इतिहासश्च। **श्रेयोऽङ्कः १**

- मायाचतुरश्रस्य महत्त्वम्।
- प्राचीनभारते अस्य उल्लेखाः।
- ऋग्वेदे मायाचतुरस्रस्य उल्लेखः।
- नागार्जुनस्य मायाचतुरस्राणि तत्र विशेषाश्च।
- वाराहमिहिरस्य मायाचतुरस्राणि।
- जैनगणितेषु मायाचतुरस्राणि तत्र विशेषाश्च।

अन्वितिः २. नारायणपण्डितस्य भद्रगणितम्। **श्रेयोऽङ्कः १**

- भद्रगणितम्।

- तस्य परिभाषा स्वरूपविस्तारः क्षेत्रनिर्णयश्च।
- भद्रगणिते नारायणपण्डितस्य वैशिष्ट्यम्।
- भद्रगणितम् इति नाम्नः व्युत्पत्तिः महत्त्वं च।

अन्वितिः ३. मायाचतुरश्रस्य विभिन्नरूपाणि - १ **श्रेयोऽङ्कः १**

- सामान्यमायाचतुरश्रे चतुरश्रनियमः मायासंख्यानियमश्च।
- मायाचतुरस्रनिर्माणे प्रयुक्तानां श्रेणीनां निर्धारणम्।
- ४ × ४ आकारेण मायाचतुरस्रस्य निर्माणम्।
- वामदक्षिणचालनप्रकाराभ्यां संख्यास्थापनविधिः अस्य विभिन्नरूपाणि च।
- मायाचतुरस्रनिर्माणे अनियतसंख्याश्रेणीनामुपयोगः।
- अनियतश्रेणीनिर्धारणे प्रकारद्वयम्।
- चतुरस्रपरिवर्तनपद्धतिः।

अन्वितिः ४. मायाचतुरश्रस्य विभिन्नरूपाणि – २ **श्रेयोऽङ्कः १**

- समगर्भचतुरस्रनिर्माणम्।
- करसम्पुटविधानम्।
- मायाचतुरश्रे दीर्घचतुरश्रविधानम्।
- नियतानियतसंख्याभ्यः विषमगर्भचतुरस्रनिर्माणम्।
- दश-चतुर्दश-अष्टादशचतुरश्राणां निर्माणविधिः।
- पीठपङ्क्तिविधानम्, विषमभद्रसम्पुटविधानम्।
- विषमभद्रे लघूपायः।
- सङ्कीर्णभद्राणि तत्र वितान-मण्डप-वज्र-सर्वतोभद्र-द्वादशकर-वज्रपद्म-पद्मभद्र-षट्कजभद्र-पद्मवृत्तानि च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Kavirāj, Gopinātha, & Dvivedī, Padmakara (Eds.). (1936). Gaṇitakaumudī (Parts 1–2) [by Narāyaṇa Paṇḍita]. Government Printing Press.

सहायकाः ग्रन्थाः (Additional Readings)

1. Rao, S. Balachandra, & Shailaja, M. (Eds.). (2016). Māyācaukagala-svārasyā [In Kannada]. Navakarnataka Publications.
2. Heroor, Venugopal D. (Ed.). (2024). Bhadragaṇitam [In English]. Central Sanskrit University.

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 1.क.4: ज्योतिर्गणितम् (प्रथमः परिच्छेदः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ग्रहगणिते वेङ्कटेशकेतकरेण नूतनतया प्रतिपादितानां गणितविधीनाम् अध्ययनम्।
2. ग्रहगणिते पाश्चात्यपद्धतीनां विमर्शनं तासां वैशिष्ट्यस्य अवगाहनं च।
3. ग्रहगणिते प्राच्यपाश्चात्त्यपद्धत्योः सामञ्जस्यसम्पादनम्।
4. सिद्धैः कोष्ठकैः लघुना उपायेन तिथ्यादीनां साधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ग्रहगणिते प्राच्य-पाश्चात्यपद्धत्योः तुलनात्मकम् अध्ययनं कर्तुं सामर्थ्यं प्राप्स्यन्ति।
2. ग्रहाणां रविमध्यगणितं भूमध्यगणितं च अधीत्य तस्य गणितस्य उपपत्तिमपि ज्ञात्वा अन्यान् गणितप्रकारान् स्वयं प्रतिपादयितुं प्रवीणाः भविष्यन्ति।
3. ग्रन्थोक्तप्रकारेण स्वदेशीयं पञ्चाङ्गं विरचयितुं पटवः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 1.क.4	ज्योतिर्गणितम् (प्रथमः परिच्छेदः)	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. पञ्चाङ्गाध्यायः। **श्रेयोऽङ्कः १**

- ग्रन्थवैशिष्ट्यम्।
- पौष्णान्तविचारः।
- पञ्चाङ्गगणितार्थं प्रतिमासं प्रतितिथि च।
- ध्रुवानयनम्।
- पराख्यानयनम्।
- गतगम्यभाज्यहारसाधनम्।
- तिथ्यादीनां समाप्तिकालाः।
- गणितोदाहरणम्।
- पञ्चाङ्गलेखनक्रमः।

- सङ्क्रान्तिः।
- महानक्षत्राणि।
- अब्दपतिः।
- तिथिशुद्धिः।
- विषुवायनर्तूनां कालानयनम्।
- मध्यमाः सूर्य-सूर्योच्च-चन्द्र-चन्द्रोच्च-पाताः।
- स्पष्टाः चन्द्रः सूर्यः एतयोर्गतिः चन्द्रशरः रवीन्द्वोः बिम्बं भूभा रविक्रान्तिः परमलम्बनं चरः रव्युदयान्तरं च।
- उज्जयिनीमध्यरेखातः इष्टग्रामे अर्कसावनकालानयनम्।
- दिनमानादिकं, रेखान्तरप्रयोजनं च। (एतत्साधनाय कोष्ठकाः उपकोष्ठकाश्च आहत्य २०)

अन्वितिः २. चन्द्रसूर्याध्यायः। **श्रेयोऽङ्कः १**

- चन्द्रभोगगणितम्, चन्द्रशरगणितम्, सूर्यभोगगणितम्, अन्तर्न्यासगणितम्, पूर्णिमान्ते चन्द्रतुलना च। (एतत्साधनाय १० कोष्ठकाः)

अन्वितिः ३. ग्रहगणिताध्यायः। **श्रेयोऽङ्कः १**

- अहर्गणः।
- ग्रहाणां मध्यमगणितम्।
- गुरुशन्योः मिथः आकर्षणम्।
- केन्द्रदिवसाः।
- पाताः।
- ग्रहाणां रविमध्यगणितम्।
- रविमध्ये दृश्याः ग्रहाणां भोगाः मन्दकर्णाः शराश्च।
- ग्रहाणां भूमध्यगणितं शीघ्रकेन्द्रं स्पष्टग्रहाः स्पष्टगतिश्च।
- ग्रहाणां शीघ्रकर्णादिः।
- विषुवकालः क्रान्तिः तयोर्गतिश्च।
- ग्रहाणाम् अवान्तरविशेषाः।
- गणितोदाहरणं च। (एतत्साधनार्थं २० कोष्ठकाः)

अन्वितिः ४. नक्षत्राध्यायः। **श्रेयोऽङ्कः १**

- नक्षत्राणां विषुवकालः क्रान्तिः।
- मध्यमसूर्यस्य विषुवकालः।
- ग्रहर्क्षाणामुदयमध्यास्तकालाः।
- चन्द्रोदयगणितम्।
- सूर्यसिद्धान्तव्याख्यामुखेन धनिष्ठायोगतारानिर्णयः।

- वराहमिहिरोक्तदिशा धनिष्ठायोगतारानिर्णयः, पौष्णान्तोपपत्तिः च। (साधनार्थं ४ कोष्ठकाः)

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वेङ्कटेशकेतकर, (1898), ज्योतिर्गणितम्, पूना : आनन्दाश्रममुद्रणालयः।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

चितस्वशास्त्रविषयः (DSE) 2.क.1: ब्राह्मस्फुटसिद्धान्ते क्षेत्रव्यवहारः कुट्टकञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. त्रिभुज-चतुर्भुज-वृत्तादिक्षेत्राणां लक्षणपरिज्ञानपूर्वकं तद्गणितविधीनाम् अध्ययनम्।
2. कुट्टकगणितस्य ग्रहगणितोपयोगित्वप्रदर्शनम्।
3. क्षेत्रव्यवहारे कुट्टके च अन्येषां मतानां विमर्शनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. त्रिभुजादिक्षेत्रगणितीयविषयेषु पाश्चात्त्यगणितं प्रति भारतीयगणितस्य प्रभावः कीदृशः वर्तते इति लोके प्रतिपादयितुं कुशलाः भविष्यन्ति।
2. ग्रहगणिते वेधेन निर्ज्ञातुं दुश्शकयोः मन्दोच्चपातयोः भगणानां निर्धारणार्थं कुट्टकगणितं कथम् उपयुक्तं भवतीति निरूपयितुं सामर्थ्यं प्राप्स्यन्ति।
3. व्यावहारिकगणिते ग्रहगणिते च भास्कराचार्यप्रभृतीनामुत्तरवर्तीनामाचार्याणामुपरि ब्रह्मगुप्तस्य प्रभावं गवेषणदृष्ट्या अध्येतुं तुलनां कर्तुं च समर्थाः भविष्यन्ति।
4. कुट्टकगणितस्य ग्रहगणितोपयोगित्वप्रदर्शनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.1	ब्राह्मस्फुटसिद्धान्ते क्षेत्रव्यवहारः कुट्टकञ्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. क्षेत्रव्यवहारः - १ **श्रेयोऽङ्कः १**

- क्षेत्रव्यवहारे आबाधाज्ञानम्।
- चतुर्भुजे लम्बकर्णयोः आनयनम्।
- जात्यत्रिभुजे भुजकोटिकर्णानयनम्।
- लम्बकर्णयोः ऊर्ध्वाधरखण्डानयनम्।
- चतुर्भुजोपरिगतवृत्तस्य व्यासानयनम्।

- त्रिभुजोपरिगतवृत्तस्य व्यासानयनम्।
- विषमचतुर्भुजे कर्णयोरानयनम्।
- विषमचतुर्भुजे लम्बानयनम्।
- विषमचतुर्भुजे कर्णयोगतः कर्णखण्डानयनम्।
- विषमचतुर्भुजे मध्यलम्ब-ऊर्ध्वाधरखण्डज्ञानम्।
- इष्टकल्पनया भुजकोटिकर्णानयनम्।
- अभीष्टजात्यद्वयेन विषमत्रिभुजानयनं च।

अन्वितिः २. क्षेत्रव्यवहारः - २ **श्रेयोऽङ्कः १**

- जात्यद्वयेन आयतानयनम्।
- समानलम्बचतुर्भुजक्षेत्रम्।
- कोटिकर्णानयनम्।
- वृत्तक्षेत्रगणितम्।
- ज्याव्यासयोरानयनम्।
- ज्याव्यासाभ्यां शरानयनम्।
- वृत्तसंयोगे जीवाशराभ्यां व्यासयोरानयनं च।
- लीलावत्यां क्षेत्रव्यवहारे भास्कराचार्येण उक्तानां सूत्राणां ब्रह्मगुप्तोक्तसूत्रैः सह तुलना च।

अन्वितिः ३. कुट्टकगणितम् - १ **श्रेयोऽङ्कः १**

- कुट्टकप्रयोजनम्।
- कुट्टकप्रशंसा।
- कुट्टके विशेषः।
- भगणादिशेषतः अहर्गणानयनम्।
- स्थिरकुट्टककथनम्।
- स्थिरकुट्टकात् अहर्गणानयनम्।
- स्थिरकुट्टके विशेषः।
- विलोमगणितं च।

अन्वितिः ४. कुट्टकगणितम् - २ **श्रेयोऽङ्कः १**

- कुट्टकप्रश्नाः, भास्कराचार्येण बीजगणिते उक्तस्य कुट्टकस्य स्वरूपम्, उभयोः गणितयोः तुलना च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Sharma, A. R. (Ed.). (1966). Brāhmasphuṭasiddhāntaḥ. Indian Institute of Astronomical & Sanskrit Research.

सहायकाः ग्रन्थाः (Additional Readings)

1. Bhāskara II. (1931). *Līlāvatī* (G. P. Dwivedi, Ed.). Newul Kishor Printing Press.
2. Nārāyaṇa Paṇḍita. (1936). *Gaṇitakaumudī* (G. Kaviraj & P. Dwivedi, Eds.). Tara Printing Works.
3. Mahāvīrācārya. (1912). *Gaṇitasārasaṅgrahaḥ* (M. Rangacharya, Ed.). Superintendent Government Press.
4. Śrīdhara. (2004). *Triśatikā*. Rāṣṭrīya Saṃskṛta Saṃsthān.
5. Bhāskara II. (2012). *Bījagaṇitam* (A. Jha, Ed.). Chaukhambha Prakashan.
6. Nārāyaṇa Paṇḍita. (2019). *Bījagaṇitāvatamsaḥ* (V. D. Heroor, Ed.). Kavikulaguru Kalidas Sanskrit University.

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 2.क.2: सिद्धान्तसम्राट् (द्वितीयः भागः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. नक्षत्राणां वेधवशात् ध्रुवकादीनां स्पष्टक्रान्तेः च परिज्ञानम्।
2. बुधशुक्रयोः अन्येषां ग्रहाणां च सारिणीवशात् स्पष्टीकरणप्रक्रियायाः परिज्ञानम्।
3. नक्षत्राणाम् अस्तोदयादिकालज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राच्य-पाश्चात्त्यगणितपद्धत्योः प्रक्रियाम् अवगन्तुं पटवो भविष्यन्ति।
2. पाश्चात्त्यग्रहगणितस्यापि मूलं भारतीयं ग्रहगणितमेव इति लोके प्रसारयितुं समर्थाः भविष्यन्ति।
3. वेधितानां नक्षत्राणां संख्यां निश्चित्य तेषां क्रमविन्यासज्ञानं प्राप्स्यन्ति।
4. गोलरचनायाः प्रकारं तत्त्वतः बोधयितुं, नक्षत्राणाम् अस्तोदयमध्याह्नकालवर्णनस्य गणनाप्रक्रियां ज्ञातुं च कुशलाः भविष्यन्ति।
5. ग्रहगणितस्य परिष्करणे नूतनं मार्गम् अन्वेष्टुं सामर्थ्यं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.2	सिद्धान्तसम्राट् (द्वितीयः भागः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सम्राट्सिद्धान्तस्य सप्तमः अध्यायः। **श्रेयोऽङ्कः १**

- नक्षत्रबिम्बानां स्थिरत्वादिप्रतिपादनम्।
- नक्षत्रगोलस्य कदम्बद्वयानुरोधेन पश्चाद्भ्रमणप्रतिपादनम्।
- स्पष्टक्रान्तयः।
- वेधद्वयकालदर्शनम्।
- नक्षत्राणां क्रान्तेः शरस्य च सारिणी।
- राशीनां पृथक् पृथक् नक्षत्रविशेषाणां च ध्रुवकादिनिरूपणम्।

अन्वितिः २. सम्राट्सिद्धान्तस्य अष्टम-नवमाध्यायौ। **श्रेयोऽङ्कः १**

- अष्टमाध्याये – वेधितानां नक्षत्राणां संख्यानिरूपणम्।
- आकाशगङ्गासंस्थानम्।
- गोलरचनाप्रकारः।
- नक्षत्राणाम् अस्तोदयमध्याह्नकालवर्णनम्।
- चत्वारि क्षेत्राणि।
- नवमाध्याये – ग्रहकक्षास्थितिवर्णनम्।
- मध्यगतिशीघ्रकेन्द्रगत्योः सारिणी।
- बुधस्य उच्चगति-परमनीचस्थान-परमफलानां विचाराः।
- दश क्षेत्राणि।

अन्वितिः ३. सम्राट्सिद्धान्तस्य दशम-एकादशाध्यायौ। **श्रेयोऽङ्कः १**

- दशमाध्याये- शुक्रविचारः तत्र नीचोच्चवृत्तव्यासार्ध-प्रतिवृत्तभूकेन्द्रान्तर-केन्द्रद्वयान्तर-केन्द्रगति-क्षेपादीनां साधनम् च।
- भौम-गुरु-शनीनां वेधोपकरणानि, क्षेत्राणि च।
- एकादशाध्याये ग्रहाणां वेधत्रयनिरूपणम्।
- वेधन स्पष्टगतिविवेकः।
- भौम-गुरु-शनीनां क्षेपाः।
- सारिणीनिरूपणं ततः फलस्पष्टीकरणं च।

अन्वितिः ४. सम्राट्सिद्धान्तस्य द्वादश-त्रयोदशाध्यायौ। **श्रेयोऽङ्कः १**

- द्वादशाध्याये – वक्रगतिज्ञानोपकरणानि।
- वक्र-मार्गगतिसारिणी।
- स्पष्टरवितः प्रत्येकं राशौ बुधशुक्रयोः परमान्तरज्ञानम्।
- दिनरात्रिविभागेन सूर्यात् बुधशुक्रयोः परमकर्णानयनसारिणी।
- क्षेत्राणि च। त्रयोदशाध्याये – शरविचारः।
- शरानयने बुधशुक्रयोः अन्येषां च विशेषः।
- सारिणीतः शरसाधनम्।
- ताराग्रहाणामुदयास्तनिरूपणं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Śarmā, Rāmasvarūpa (Ed.). (1967). Samrāṭsiddhāntaḥ. Indian Institute of Astronomical & Sanskrit Research.

सहायकाः ग्रन्थाः (Additional Readings)

1. Miśra, Bābuvājī (Ed.). (1932–1947). *Siddhāntaśekharaḥ* (Parts 1–2). University of Calcutta.
2. Kapileśvara Śāstrī, Śrī. (1946). *Sūryasiddhāntaḥ (Tattvāmṛtatīkā-sametah)*. Chaukhamba Sanskrit Series Office.
3. Śarmā, Rāmasvarūpa Ācārya (Ed.). (1966). *Brāhmasphuṭasiddhāntaḥ*. Indian Institute of Astronomical & Sanskrit Research.

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

चितस्वशास्त्रविषयः (DSE) 2.क.3: रेखागणितम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. रेखाधरातलसम्बन्धविषयकज्ञानम्।
2. वृत्तान्तःसम्बन्धजन्यविषयाणाम् अध्ययनम्।
3. धरातलगतैः त्रिभिः कोणैः यः घनकोणः भवति तत्र कोणद्वययोगः तृतीयकोणादधिकः भवतीत्यादिविषयाणामवगमनम्।
4. एकस्मिन् धरातले यदि द्वे रेखे लम्बरूपे तदा ते रेखे समानान्तरे स्यातामित्यादिविषयाणामध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. रेखागणितस्य मूलपरिभाषाः घनक्षेत्रादीनां स्वरूपं च व्याख्यातुं शक्ताः भविष्यन्ति।
2. समानान्तररेखाणां, कोणभुजयोः च सम्बन्धं स्पष्टं व्याखास्यन्ति तथा धरातलयोः समानान्तरभावं, रेखाधरातलसम्बन्धं च व्यावहारिकदृष्ट्या अवबोधयिष्यन्ति।
3. धरातलयोः रेखाधरातले वा लम्बकरणस्य प्रकारान् अवगम्य तेषां प्रयोगं दर्शयिष्यन्ति तथा धरातलयोः रेखयोः च सम्पातं, लम्बं च निर्देष्टुं ज्ञानं सम्पादयिष्यन्ति।
4. वृत्तद्वयान्तर्गते ये सजातीये क्षेत्रे तयोः फलोत्पन्नं निष्पत्तिमानं यत् तथा व्यासवर्गजं सम्बन्धमानं च यत्, ते द्वे अपि सम्बन्धमाने समे भवेताम् इत्यादिविषयाणां सोपपत्ति प्रतिपादने प्रवीणाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
चितस्वशास्त्रविषयः (DSE) 2.क.3	रेखागणितम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. रेखागणितस्य एकादशः अध्यायः (१ - १५ क्षेत्राणि) **श्रेयोऽङ्कः १**

- घनक्षेत्रादीनां परिभाषाः।
- रेखाधरातलसम्बद्धाः विषयाः।
- धरातलयोः रेखयोः च सम्पातः।
- रेखाधरातलगतो लम्बः।
- मिथः समानान्तराः रेखाः।

- कोणभुजयोः सम्बधः।
- धरातले पिण्डात् इष्टचिह्नात् वा लम्बकरणम्।
- धरातलयोः समानान्तरता च।

अन्वितिः २. रेखागणितस्य एकादशः अध्यायः (१६ - ३० क्षेत्राणि) **श्रेयोऽङ्कः १**

- सम्पातरेखयोः समानान्तरत्वम्।
- धरातलगतस्य लम्बस्य विशेषः।
- घनकोणः।
